॥ मिथ्यात्वानुमानखंडनमंदारमंजरीप्रारंभः ॥

श्रीमद्भनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ कमलारमणंनत्वापूर्णबोधेष्टदैवतं । व्याकुर्वेविश्वमिथ्यात्वमानखंडनपंचिकां ॥ १ ॥ स्पष्टार्थोयइहग्रंथःसनव्याक्रियतेमया । ग्रंथगौरवभीरुत्वान्नचोद्भ्रंथंबहूच्यते ॥ २ ॥ प्रपंचमिथ्यात्वानुमानखंडनंव्याचिख्यासुर्जयतीर्थाचार्यवर्यःग्रंथादौमंगलमाचरंश्चिकीर्षितंनिर्दिशति ॥ नत्वेति । यद्यपिसृष्टिसंहारप्रवाहस्यानादित्वेनदर्शपौर्णमासीतिथ्योरिवनैकस्यानादित्वंसंभवति । तथाप्युत्पन्नस्यनाशवन्नष्टस्यनोत्पत्तिरित्येकव्यक्त्यपेक्षयोदयादेःप्राथम्यादीतिसृष्टिस्थितिलयानांक्रमनिर्देशउपपन्नः । व्याख्येयस्यास्यग्रंथस्यप्रकरणतासिद्धये शास्त्रैकदेशसंबंधित्वंदर्शयति ॥ जन्माद्यस्ययतइत्यादिना ॥ निमित्तकारणत्वमिति । उपादानकारणत्वेचब्रह्मणोनिर्विकारत्वानुपपत्तिः । विवर्ताधिष्ठानत्वेतुश्रुतौयतोवाइमानिभूतानिजायंतइतिनिर्देशःसूत्रेजन्मादीतिनिर्देशश्चासंगतःस्यात् । नहि शुक्तिकातोरजतंजायतइतिव्यपदेशोस्तीतिभावः ॥ नचतद्व्याप्तंवंसंभवतीति । जगत्कारणत्वस्यावास्तवत्वेतत्प्रतिपादकश्रुतिसूत्राप्रामाण्यप्रसंगइतिभावः ॥ तथापीति । तथापिशास्त्रेस्वपक्षसाधनाभावेननिर्णयासंभवेपिपरपक्षदूषणेनजगत्सत्यत्वस्याश्रद्धेयतानिरासमात्रंभविष्यतीत्यर्थः ॥ नापितद्व्याप्तमिति । कर्मणिक्तः । ततश्चव्याप्तेःकर्मव्याप्यमितिटीकाकारैरन्यत्रोक्तत्वात् । तत्अनुष्ठानं व्याप्तंव्याप्यं यस्यग्रंथेनिवेशनस्यतत्तद्व्याप्तमितिबहुव्रीहिः । यद्वातदितिव्यस्तंपदं । तथाचतत् अनुष्ठानंग्रंथेनिवेशनेनव्याप्तमित्यर्थः । अथवाभावेक्तः । तयोरेवकृत्यक्तखलर्थाइतिकर्मणीवभावेपिक्तविधानात् । ततोभुक्ताब्राह्मणाःपीतागावइत्यादाविवमत्वर्थीयोऽकारः । तथाचग्रंथेनिवेशनंव्यापकत्वेनव्याप्तिनिरूपकतयाअनुष्ठानेनव्याप्तिमदि

त्यर्थः । यद्वाचैत्रोग्रामंप्राप्तइत्युक्तेग्रामंगतइत्यर्थप्रतीतेःआप्नोतेरपिगत्यर्थत्वात् द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापैन्नेरितिसूत्रेकर्त्रर्थस्यप्राप्तशब्दस्यपाणिनिनापिप्रयुक्तत्वाच्चगत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चेत्यादिनासूत्रेणकर्तरिक्तः । तथाचव्याप्तेःकर्तृव्यापकमितिटीकाकारैरन्यत्रोक्तत्वाद्ग्रंथेनिवेशनं तस्यानुष्ठानस्यव्यापकमित्यर्थः । एवंचपक्षचतुष्टयेप्ययंवाक्यार्थः । ग्रंथेनिवेशनमनुष्ठानव्यापकंचेदनिवेशनेनाननुष्ठानमनुमीयेत । तथात्वंतुनास्तीत्यर्थः । यद्वाग्रंथेनिवेशनमेवानुष्ठानव्याप्यंचेदनुष्ठानेलिंगांतराभावात् रूपोपलब्ध्येकलिंगस्य चक्षुषोरूपानुपलब्ध्याऽभावइवानिवेशनेनाननुष्ठानमनुमीयेत । तथात्वंतुनास्तीति । ग्रंथकर्तुराचार्यस्यपरमास्तिकत्वादिलिंगांतरस्यापिसत्त्वादितिवाक्यार्थः ॥ अवगंमिष्यंतीति । ग्रंथादौमंगलाचरणस्यकर्तव्यतामितिशेषः । आचार्यकर्तृकारंभस्यान्यत्रमंगलाचरणेनभूयःसाहचर्यदर्शनादुपाधिव्यभिचारयोरदर्शनादत्रापितदनुष्ठानंनिश्चीयतइत्याह ॥ अतएवेति ॥ अवच्छेदकानुक्ताधिति । अयमर्थः । वियदादीत्यत्रादिशब्दःकिमसंकुचितवृत्तिः । किंवासंकुचितवृत्तिः । आद्येब्रह्मशुक्तिरूप्ययोरपिपक्षतयाबाधसिद्धसाधनते । द्वितीयेविवक्षितव्यक्तिविशेषाणामनंतत्वेनतत्तन्नाम्नाजन्मसहस्रेणापिनिर्देष्टुमशक्यत्वादियानेवादिशब्दार्थइतिकिंचिदवच्छेदकंवाच्यं । तच्चविमतिविषयत्वातिरिक्तंनास्ति । यद्यप्यसद्विलक्षणत्वेसतिप्रातिभासिकातिरिक्तत्वेसतिब्रह्मव्यतिरिक्तत्वंपक्षतावच्छेदकमस्ति । तथापिप्रतीतिगौरवान्नतदवच्छेदकं । लाघवाद्विमतिविषयत्वमेवावच्छेदकमिति ॥ गौरिति । यथायायागौःसासानपदास्प्रष्टव्येतिवीप्सायाअभावेपिसर्वगवांपदाऽस्प्रष्टव्यतासिद्धिस्तद्वदित्य

र्थः ॥ 313 तथापीति । यद्यपिदूष्यैकदेशानुवादेऽननुभाषणप्रसंगात्सर्वानुवादःप्राप्तः । तथापिभट्टमतानुसारिणापरेणाप्युपनय निगमनयोरसाधनांगतांगीकारात्पंचावयवप्रयोगेपरस्याधिकंनामनिग्रहस्थानंसूचयितुंन्यवयवानुवादःकृतइत्यर्थः । ननुस्वा र्थानुमानेप्याश्रयासिद्धिरस्त्येवततआचार्येण इत्युक्तेआश्रयासिद्धइतिकथमुक्तमित्याशंक्यसत्यमेवंतथाप्याश्रयासिद्युक्तिस्तु परार्थानुमानएव । तथाचश्रुतस्यइत्युक्तइत्यस्योपपत्तयेऽश्रुतमप्यध्याहियतइत्याह ॥ 314 वक्तव्यमितिशेषइति । नन्वितिव क्तव्यमितिशेषइतिवाच्यं । इतिशब्दाभावेआश्रयासिद्धःपक्षोवक्तव्यंइत्युक्तेऽनन्वयादितिचेन्न । इत्युक्तइत्यत्रविद्यमानस्येति शब्दस्यानुषंगेणैवसंबंधसंभवेनतस्याध्याहार्यताभावात् । नन्वसिद्धशब्दस्यनिष्ठांतत्वान्निष्ठेत्यनेनपूर्वनिपातप्रकरणगतेनसूत्रेण कृतःकटइत्यत्रकृतशब्दस्येवपूर्वनिपातेनभवितव्यमित्यतआह ॥ 315 अभ्याहितादिवदिति । वाहिताग्न्यादिष्वित्यनेनसूत्रेण आहितादीनामग्न्यादिसंबंधेपरनिपातस्याप्युक्तत्वात् । तस्यचाकृतिगणत्वात् । असिद्धशब्दस्यविकल्पेनपूर्वनिपातोपपत्तिरि त्यर्थः । ननुविशेषणंसाध्यधर्मप्रतियआश्रयोधर्मीविशेष्यःतदसिद्धिरेवदोषोविशेष्याभावेविशिष्टाभावेनधर्मविशिष्टधर्मिविष यकस्यानुमानस्याप्रामाण्यापातात् । नतुसाध्यधर्मविशिष्टस्यपक्षस्ययआश्रयस्तदसिद्धिःप्रकृतानुपयोगात् तस्मादाश्रयासिद्धः पक्षइतिकथमाचार्येणोक्तमित्याशंक्याह ॥ 316 पक्षइतितदेकदेशइति । अथवाआश्रयोसिद्धोयस्मिन्पक्षइतिसप्तम्यर्थेबहुव्री हिरित्याह ॥ 317 अथवेति । पक्षस्यसाध्यतदाश्रयरूपोभयसमुदायात्मकत्वात्समुदायस्याश्रयत्वंप्रतिअधिकरणत्वोपपत्तिर्वनेचूत इत्यादौतद्दर्शनात्तेनसप्तम्यर्थोपपत्तिरितिद्रष्टव्यं । नन्वाचार्येण इत्यत्राश्रयासिद्धःपक्षइत्येववक्तव्यं । किमर्थमुक्तग्रहणंकृतं ।

यदुपपत्त्यर्थंवक्तव्यपदमध्याहियतइत्यतआह ॥ उक्तइतीति । मिथ्याशब्दस्यानिर्वचनीयवाचिताया अन्यत्रनिरस्तत्वाद्धि मतमसदित्यनुक्तावपिमिथ्याशब्देनैवासत्त्वस्योक्तत्वान्मिथ्येत्युक्तिनिमित्तमिदंदूषणंनतुपराभिप्रेतानिर्वचनीयत्वादिरूपार्थनि मित्तमिति । उक्तइतिनिमित्तसप्तमीप्रयोगात्सूचयताचार्येणानुक्तोपालंभोयंपरेणासत्वस्यासाधनात् । अनिर्वचनीयत्वरूपमि थ्यात्वस्यैवतेनसाधनादितिनिरस्तंभवति । तेनानुक्तोपालंभनिराससूचनार्थमुक्तइतिवक्तव्यमित्यर्थः । अन्येतुखपुष्पंसुरभी त्यादावित्वनयस्तुतआश्रयासिद्धिः । प्रपंचस्यसत्त्वात् । किंतुमिथ्येतिपरोक्तिनिमित्तेत्यनेनप्रकारेणोक्तिनिमित्तमितिग्रंथंव्या चक्षते । असिद्धत्वपक्षंदूषयति ॥ असिद्धश्चेत्तथापीति । सिद्धंपरस्याभिमतमित्येनेनानुषक्तेनास्यसंबंधः । तत्रहेतुरसि द्धाश्रयत्वेति । आचार्येणपक्षग्रहणेनसूचितमाश्रयासिद्धेःप्रतिज्ञादोषत्वंदर्शयति ॥ तंतश्चेति । ननुयत्रविशेष्यसद्भावोविशे षणाविरोधीतत्रविशेष्याभावेविशिष्टाभावः। यथापुरुषाभावेदंड्यभावः । प्रकृतेतुप्रपंचरूपविशेष्यसद्भावोमिथ्यात्वलक्षणविशे षणविरोधी । ततश्चविशेष्यसद्भावांगीकारेविशेषणायोगाद्विशेषणाभावप्रयुक्तोविशिष्टाभावस्यात् । प्रध्वस्तोघटइत्यत्रघट सद्भावांगीकारइयप्रध्वंसविशिष्टघटाभावः । तस्मात्कथमुक्तंविशेष्याभावाद्विशिष्टाभावइति । मैवं । प्रतिपन्नस्वभावानुपम र्देनसत्यविवेकापरपर्यायधर्मसाधनमितिवदतापरेणप्रपंचरूपविशेष्येसद्विलक्षणस्वरूपसद्भावस्य मिथ्यात्वलक्षणविशेषणानुकू लतांगीक्रियते । ततश्चविशेषणस्यार्थतासत्त्वेविशेष्याभावेनविशिष्टाभावापरिहारादिति । ननुमिथ्याशब्दस्यानिर्वचनीयावा चित्वेपि तार्किकैस्समवायशब्देननित्यसंबंधवत् परैरपिपरिभाषामात्रेणापिमिथ्याशब्देनानिर्वचनीयत्वस्यविवक्षितुंशक्यत्वा

विवक्षितंपक्षंपरित्यज्याविवक्षितासत्वपक्षाश्रयणेनाश्रयासिद्ध्यभिधानेछलप्रसंगइत्याशंक्याह ॥ 3।1।11 **विकल्पेनोपक्रमादिति** । आचार्योमिथ्यात्वंकिमसत्वंकिंवानिर्वचनीयत्वादीतिविकल्पंहृदिनिधायाद्येआश्रयासिद्धिमाह । अन्यत्रदोषंवक्ष्यति । तेनछल प्रसंगोनास्तीत्यर्थः । एतच्चासत्त्वपक्षएवाश्रयासिद्धिर्नान्यत्रेत्यभ्युपेतवादेनोक्तं । वस्तुतस्त्वनिर्वचनीयत्वादिपक्षेप्याश्रयत्वप्रयो जकसत्त्वाभावेनाश्रयासिद्धिर्दुर्वारेतिविकल्पेनोपक्रमाभावेपिनछलताप्रसंगइतिद्रष्टव्यं । ननुपराभिप्रेतएवपक्षोदूष्यः । किमन भिप्रेतासत्त्वपक्षदूषणार्थंविकल्पेनेतित्रत्राह ॥ 3।1।13 **शिष्याणामिति** । शुक्तिरूप्यादेर्मिथ्यात्वमस्मद्रीत्याऽसत्त्वंपरस्यत्वनिर्वचनीय त्वादिकमिति । तथाचप्रकृतेकारीतिरितिविकल्पयताऽऽचार्येणान्यत्रापिसामान्यशब्देप्रयुक्तेरीतिद्वयसंभवेनविकल्पपूर्वकमेव दोषोवाच्यः । पराभिप्रेतपक्षएवदोषाभिधानेपरस्वद्रीत्यामयोक्तंतस्मादनुक्तोपालंभइतिप्रतारयेदितिसूचितमित्यर्थः । एवंजगतो विश्वस्याभावादितिपदविभागमाश्रित्यव्याख्यातं । इदानींभावादितिपदविभागमाश्रित्यव्याचष्टे ॥ 3।1।13 **अथवेति** । अपसिद्धांतंवक्तुं पक्षाश्रयासिद्धशब्दान्व्याचष्टे ॥ 3।1।13 **पक्षइत्यादिना** यावदित्यंतेन । भावादित्येतद्व्याचष्टे । भावत्वेनांगीकृतत्वादिति । भावत्वे नेतिस्वपदंविवृणोति ॥ 3।1।14 **असद्विलक्षणत्वेनेति** । ननुसाध्यधर्मविशिष्टःपक्षः । तस्यकथमप्रसिद्धंविशेषणंस्येतिबहुव्रीहिणाआ चार्येणसाध्यधर्मवैशिष्ट्यमुक्तं । नहिदंडिनःपुनर्दंडवैशिष्ट्यं किंतुदेवदत्तस्यैवेत्यतआह ॥ 3।1।15 **पक्षइतितदेकदेशइति** ॥ 3।1।17 **अन्यथेति** । निर्वचनानर्हंकिमितिप्रश्नेयदीदमितिवदेत्तदास्वव्याघातः । नचेन्मूकतेत्यर्थः ॥ 3।1।16 **अयमपिवचननिमित्तइति** । यथाश्र यासिद्धिर्मिथ्यापदोक्तिनिमित्ताएवमप्रसिद्धविशेषणत्वमप्यनिर्वचनीयपदप्रयोगनिमित्तं । तस्य(च)निर्वचनानर्हत्वात्तस्यचाप्र

सिद्धत्वात् । नतुपरपरिभाषितसदसद्विलक्षणत्वरूपार्थनिमित्तं । तत्रसिद्धसाधनत्वादेर्वक्ष्यमाणत्वादित्यर्थः ॥ **करणसाधनेत्वेहीति** । तथात्वेसाधनंलिंगंस्यात् । तथाचसिद्धसाधनतापितन्निष्ठैवेतिहेतुदोषःस्यादित्यर्थः । सदसद्विलक्षणमितिकोर्थः । सदसद्रूपंयदेकंततोविलक्षणमितिवा सद्विलक्षणमसद्विलक्षणंचेतिवासद्विलक्षणत्वेसत्यसद्विलक्षणमितिवा । आद्येसदसद्रूपतायाःप्रपंचेमयाप्यनंगीकारात्सिद्धसाधनताप्रसंगेनद्वितीयएवांगीकार्यइत्याह ॥ **सदसद्वैलक्षण्यइति** । तर्हिद्वितीयएवास्त्वित्यतआह ॥ **तत्रेति** ॥ **नहिसिद्धमसिद्धेनेति** । पर्वतःशिलात्मकोऽग्निमांश्चेत्यादाविवांशेसिद्धसाधनतादुर्वारेत्यर्थः। तृतीयंशंकते॥**सद्वैलक्षण्येति**।विशिष्टस्याखंडैकपदार्थांतरत्वान्नांशस्तत्रापि येनांशेसिद्धसाधनतास्यात्।अन्यथाप्रामाण्यंस्वतोज्ञायतइतिप्रतिज्ञायांज्ञानमात्रस्यपरतस्त्ववादिनाप्यंगीकारादंशेसिद्धसाधनतास्यादित्यर्थः । परिहरति ॥ **तथापीति** । तर्हिसदसत्त्वानाश्रयत्वंसाध्यमितिचेत् किमत्रसदसद्रूपंयद्विविशिष्टंतदनाश्रयत्वंसाध्यते किंवासत्त्वानाश्रयत्वं असत्त्वानाश्रयत्वंचेतिद्वयं । यद्वासत्त्वानाश्रयत्वेसत्यसत्त्वानाश्रयत्वंनामविशिष्टमितिविकल्प्याद्यंदूषयति ॥ **सदसद्वैलक्षण्यंनामेति** । दूषयति ॥ **तथापीति** । द्वितीयंशंकते ॥ **प्रत्येकमिति** । दूषयति ॥ **तथाप्यसत्त्वेति** । तृतीयंशंकते ॥ **विशिष्टेति** । ननुतथापिदेशकालेति घटादेःस(त्वकालमं)त्त्वानाश्रयत्वमंगीकृत्यपरिहारोभिहितः । सनयुक्तः । घटादेःसत्त्वाश्रयत्वांगीकारात् । स्वदेशकालाद्यवच्छेदेनसत्त्वाश्रयस्यापिघटादेःदेशांतराद्यवच्छेदेनसत्त्वानाश्रयत्वंचास्तीतिचेत् । तर्हिदेशांतराद्यवच्छेदेनासत्त्वाश्रयत्वंचास्तीतिसत्त्वैकस्वभावस्येत्येतदसंगतंस्यादितिचेत् । मैवं । सत्त्वैकस्वभावस्येत्यत्र सर्वदेशकालसं

बंधाभावरूपात्यंताभावाप्रतियोगित्वंसत्त्वंविवक्षित्वासत्त्वैकस्वभावत्वमुक्तं । तथापिदेशकालेत्यत्रत्वस्तीतिप्रमितिविषयत्वंस
त्त्वंतदविषयत्वंचासत्त्वंविवक्षित्वान्यदेशादौसत्त्वानाश्रयत्वंस्वदेशादावसत्त्वानाश्रयत्वंचोक्तमिति ॥ [३।१३] **यादृशमिति** । सर्व
थासत्त्वानधिकरणत्वेसत्यसत्त्वानधिकरणत्वेसति सदसत्त्वानधिकरणत्वमित्यर्थः । असिद्धसाधनतेतिपदविभागमाश्रित्यतत्प
रिहारतयातदेववाक्यंव्याचष्टे ॥ **तत्राप्येतदेवोत्तरमिति** ॥ [३।१४] **सर्वत्रेति** । विशिष्टसाधनपक्षे(पि)पर्वतःप्रमेयत्वेसत्यग्नि
मानित्यादाविवांशेसिद्धसाधनतादुर्वारा । प्रामाण्यंस्वतोज्ञायतइत्यादौज्ञायतइत्यनुक्त्वापिविप्रतिपन्नस्वतस्त्वमात्रस्यसाध
यितुमशक्यत्वान्नसिद्धसाधनता । नचैवंप्रकृते । असद्विलक्षणत्वमित्यनुक्त्वाग्निविप्रतिपन्नसद्विलक्षणत्वमात्रस्यसाधयितुंश
क्यत्वादितिभावः । सत्यतानाश्रयत्वमित्यत्रसत्यताशब्देनकिमुच्यते । किमर्थक्रियासामर्थ्यादिकंकिंवाव्यवहारातीतत्वलक्ष
णपारमार्थिकत्वं अथवाअबाध्यत्वमिति विकल्पयति ॥ [३।१४] **केयमिति** । आद्यमाशंकते ॥ [३।१५] **अर्थक्रियेति** । आदिशब्देनसत्ता
जात्याश्रयत्वासद्विविक्तत्वादिकं विवक्षति। अर्थक्रियासामर्थ्यादेःपक्षेपरेणाप्यंगीकारात् तदनाश्रयत्वसाधनेअपसिद्धांतइति
परिहरति ॥ [३।१६] **तदनाश्रयत्वेति** । द्वितीयमाशंकते ॥ [३।१५] **तदन्याचेदिति** । तादृशपारमार्थिकत्वानधिकरणत्वस्य पक्षेमया
प्यंगीकारात्सिद्धसाधनतेतिपरिहरति ॥ [३।१६] **सिद्धसाधनतैवेति** । तृतीयमाशंकते ॥ [३।१७] **सत्यमबाध्यमिति** ॥ [३।१७] **प्रतिपन्नोपाधा
विति** । सत्यताग्रहणाभावेबाधलक्षणमसंभविस्यात् । मायिकस्याविद्यकस्यवियदादेःशुक्तिरूप्यादेश्चमायावादिनाप्रतिभास
कालेवस्थित्यंगीकारेण स्वरूपतस्त्रैकालिकनिषेधप्रतियोगित्वानंगीकारात् । तदर्थंसत्यताग्रहणं । त्रैकालिकपदाभावेतुसिद्ध

साधनत्वं । सत्यत्ववादिनापिघटादेःकालांतरावच्छिन्नप्रतिषेधांगीकारात् तदर्थंत्रैकालिकत्वेनप्रतिषेधोविशेषितः । प्रतिपन्नो
पाधिपदाभावेपुनस्तदेव सिद्धसाधनत्वंसत्यत्ववादिनापिगोत्वादेरश्वत्वादेरुक्तप्रतिषेधांगीकारात् । तदर्थंप्रतिपन्नोपाधिपदं ।
सत्यतानिरुक्तौबाधनिरुक्तिस्तन्निरुक्तौबाध्यत्वाभावलक्षणसत्यतानिरुक्तिरित्यन्योन्याश्रयइति । परिहरति ॥ **न सत्यताया**
इति । ए(वं)तावत्सत्यतानाश्रयत्वं सत्यविवेकइतिपक्षःसत्यत्वानिरुक्त्यादूषितः । इदानीमस्तुयत्किंचित्सत्यत्वमथापितद
नाश्रयत्वसाधने अत्यंतासत्वमेवापन्नमित्याश्रयासिद्ध्यसिद्धांतौस्यातामिति । तस्मिन्नेवपक्षेदोषांतरमाह ॥ **किंचैवमिति** ॥
सत्वनिषेधातिरिक्तेति । शशशृंगादौसत्त्वाभावेनैवकृतेनासद्व्यवहारोपपत्तौतद्व्यतिरिक्तासद्व्यवहारकल्पनंनित्यत्वाभा
वातिरिक्तानित्यत्वकल्पनमिव निष्प्रमाणकमित्यर्थः ॥ **अस्तुतावदिति** । यद्यसत्त्वाभावआश्रयत्वप्रयोजकःस्यात्तदा
आश्रयत्वाभावरूपेऽनाश्रयत्वेऽसत्त्वाभावाभावरूपसत्त्वमेवप्रयोजकंस्यात् । नत्वेदस्ति । गौरवात् । किंतुलाघवेना
श्रयत्वेसत्त्वमेवप्रयोजकं । तथांचानाश्रयत्वेपिसत्वाभावएवप्रयोजकइति निश्चेतुंशक्यत्वेननिश्चिताश्रयासिद्धिरेववक्तुंश
क्या । तथापिसत्त्वाभावस्यअनाश्रयत्वप्रयोजकत्वनिश्चयाभावमुपेत्यसंदिग्धाश्रयासिद्धिरुच्यतइतितावच्छब्दाभिप्रायः ॥
व्यर्थंचेति ॥ सत्त्वेनव्यवहारमात्रंव्यावहारिकंसत्त्वमित्यंगीकारे मिथ्यात्ववादिनःसत्त्वनिषेधलक्षणप्रयोजनसहितंव्या
वहारिकपदंस्यात् । तत्तुनांगीकर्तुंशक्यं । अर्थगतसत्त्वाभावेनाश्रयासिद्धितादवस्थ्यात् । व्यवहारनिर्वाहहेतुभूतंसत्त्वं
व्यावहारिकंसत्त्वमित्यंगीकारेत्वर्थसत्त्वसंभवेनाश्रयासिद्धिपरिहारेपिसत्तायाअभ्युपगतत्वेनसत्तानिषेधलक्षणप्रयोजनसहितं

व्यावहारिकत्वविशेषणमित्यर्थः । यद्वाव्यवहारनिर्वाहेहेतुसत्तायाअभावेनव्यावर्त्याभावात् निष्प्रयोजनंविशेषणमित्यर्थः ।किंचसत्यतानाश्रयत्वमित्यत्रकिंसत्तामात्रनिषेधोभिप्रेतः किंवाव्यावहारिकसत्ताभ्युपगमेनपारमार्थिकसत्तानिषेधइतिविकल्पंहृदिनिधायाद्यंदूषयति ॥ 3।1।1 **सत्तामंगीकृत्येति** । द्वितीयमाशंकते ॥ 3।1।2 **पारमार्थिकत्वमेवेति** । दूषयति ॥ 3।1।2 **किमिदमित्यादिना** । सत्यतानाश्रयत्वमित्यत्रपारमार्थिकत्वमेवनिषिध्यते । तच्चपारमार्थिकत्वमबाध्यत्वमितिवदतापरेणाबाध्यत्वनिषेधःसत्यतानाश्रयत्वमित्युक्तंस्यात् । अबाध्यत्वनिषेधोबाध्यत्वमेव । बाधश्चपूर्वोक्तसत्यतानिषेधरूपः । तत्रचबाधलक्षणेकिंसत्तामात्रनिषेधोभिप्रेतःपारमार्थिकसत्तानिषेधोवा । तत्राद्येव्यावहारिकसत्तापिनस्यादित्याह ॥ 3।1।3 **कुतोव्यावहारिकीति** । द्वितीयेपारमार्थिकत्वज्ञानेतन्निषेधलक्षणबाध्यत्वज्ञानंबाध्यत्वज्ञानेचबाध्यत्वरूपपारमार्थिकत्वज्ञानमित्यन्योन्याश्रयइत्याह ॥ 3।1।4 **इतरेतराश्रयंदोषोवेति** । यद्यपिसत्यतायाएवाद्याप्यनिरूपणादित्यत्रापिग्रंथेनान्योन्याश्रयःप्रागुक्तः । अत्रापिसएवोच्यते । तथापिप्राक्सत्यतानाश्रयत्वमितिलक्षणेसत्यतापदेनाबाध्यत्वविवक्षायामन्योन्याश्रयप्रसंगात्तदर्थमर्थक्रियासामर्थ्यादिकंव्यवहारातीतत्वंवाविवक्षणीयं । तत्राद्येमूलग्रंथोक्तएवापसिद्धांतः । द्वितीयेतुतदुक्तैवसिद्धसाधनता । तथाचसत्यतानाश्रयत्वंसत्यविवेकइतिपक्षोपिमूलग्रंथोक्तदोषंनातिवर्ततइतिवक्तुंतदुपयोगित्वेनार्थक्रियासामर्थ्यादिपक्षंपरिशेषयितुंपक्षांतरेऽन्योन्याश्रयउक्तः । इदानींतुसत्यतानाश्रयत्वमितिलक्षणेमूलग्रंथोक्ताश्रयासिद्धिरपिवक्तुंशक्येति । किंचैवमित्यादिनाप्रक्रम्यमध्येव्यावहारिकसत्यत्वेनपरेणाश्रयत्वेशंकितेतदभावोपपादनार्थसत्यतानाश्रयत्व

मित्यत्रलक्षणेपारमार्थिकत्वनिषेधेऽन्योन्याश्रयप्रसंगात्सत्तामात्रनिषेधोपिविवक्षणीयः । तथाचव्यावहारिकसत्तायाअप्य
भावादाश्रयासिद्धिरित्येवमाश्रयासिद्धिंवक्तुंतदुपयोगित्वेनसत्तामात्रनिषेधपक्षंपरिशेषयितुंपक्षांतरेन्योन्याश्रयउच्यतइतिफ
लभेदान्नपौनरुक्त्यं । ननुनव्यवहारनिर्वाहहेतुसत्ताव्यावहारिकीसत्ता येनतवसमीहितसिद्ध्यादिकंस्यात् किंतु अन्यैवेति
शंकते ॥ ३।१४ भ्रांतिसिद्धेति । तथासतिनास्तीतिभ्रांतिसिद्धस्यास्तित्वेभ्रांतित्वस्यायोगादित्यर्थः । अरविंदत्वहेतावा
श्रयासिद्ध्यनुद्भावनमस्त्वित्याह ॥ ३।१६ अस्त्विति । कथंतर्हितस्यदुष्टत्वमित्यतआह ॥ ३।१६ अंगांतरेति ॥ ३।१७ काल्पनि
कांगेति । अकाल्पनिकांगसाकल्यंतुतवकुत्रापिनास्तीतिशेषः । एवंचसर्वमपिदुष्टंस्याददुष्टंवा । नतुकिंचिद्दुष्टंकिं
चिददुष्टमितिविभागःस्यादित्याह ॥ ३।१७ तथाचेति ॥ ३।१८ कथाभासेति । यद्यंगसाकल्यस्यकाल्पनिकत्वेपियत्रांगसाकल्यं
वादिप्रतिवादिप्राश्निकाभ्युपगतंतत्साधनमन्यच्चासादितिनियमः । तदाभ्रांतवाद्यारब्धकथाभासेंगसाकल्यवत्तयातदभ्युप
गतस्यवस्तुतोदुष्टस्यसाधनस्यादुष्टत्वंस्यात् । अविद्यमानाभ्युपगंतुर्वादित्वमेवनास्तीतिचेत्तर्ह्यंगसाकल्यस्यकाल्पनिकत्वेपि
वाद्याद्यभ्युपगमेननियमइत्यसंगतंस्यादितिभावः । एतच्चान्यत्रास्माभिःप्रपंचितं ॥ ३।१८ किंचैवंसतीति । दृश्यत्वानुमा
नांगसाकल्येउभयवादिसंमतिश्चेत्तत्प्रामाण्येपिउभयवादिसंमतिरस्तु । वस्तुतस्तुप्रामाण्यंनस्यात् । वस्तुतोंगसाकल्याभावा
त् । अंगसाकल्यंचव्यावहारिकमस्तीतिचेत्तर्हिप्रामाण्यमपिव्यावहारिकमेवास्तु । नतत्वावेदकत्वलक्षणंपारमार्थिकं । प्रयो
जकानुरोधित्वात्प्रयोज्यस्य । अन्यथाप्रातिभासिकांगसाकल्येनव्यावहारिकत्वावेदकत्वलक्षणंव्यावहारिकंप्रामाण्यंस्यादिति

भावः ॥ [3।2।] **अन्यथास्ववचनेति** । निषेधंप्रत्यसन्नाश्रयइतिनिषेधाश्रयत्वनिषेधंप्रतिअसतआश्रयत्वमंगीकृतंचेत्पुनस्तन्निषेधे स्ववचनव्याघातः । नांगीकृतंचेन्निषेधाश्रयनिषेधंप्रतिअनाश्रयत्वेनिषेधाश्रयत्वापातइत्यर्थः ॥ [3।3।] **तथासतीति** । अनुमाना श्रयत्ववदर्थक्रियांतरस्यापिव्यावहारिकसत्तांविनैवोपपत्तेर्व्यावहारिकसत्ताव्यर्थास्यात् । नचवाच्यंप्रयोजनवशान्नतदंगीकारः। किंतुसन्घटइत्यादिप्रमाणबलादिति । सद्गंधर्वनगरमित्यादिवत्तस्यप्रातिभासिकसत्ताविषयत्वेनाप्युपपत्तेः । नचवाच्यंसत्त्वे नव्यवहारातिरिक्तंव्यावहारिकंसत्त्वमेवमयानस्वीकृतं कस्यवैयर्थ्यमापाद्यतइति । असंजातबाधभ्रमविषयरूप्येपिचिरकाल मबाधितसद्व्यवहारसंभवेनतस्यगगनारोपितनैल्यादेश्चव्यावहारिकतापातादितिभावः । नन्वसतोऽवस्तुरूपत्वादवस्तुभूतनि षेधंप्रत्याश्रयत्वंयुक्तंनतुविधिंप्रति । तस्यवस्तुत्वेनतदाश्रयस्यासतोपिवस्तुत्वप्रसंगादित्याशंक्यविधिनिषेधयोःस्वरूपसत्त्वरूप वस्तुत्वेनकश्चिद्विशेषः । अभावोस्तीतिप्रतीतेस्तस्यापिस्वरूपसत्त्वादित्याह ॥ [3।3।] **नहिविधीति** । वस्तुत्वइतिविषयसप्तमी । नचनिषेधाश्रयत्वेवंध्यासुतोनवक्तेत्यनुभवएवविशेषः । वंध्यासुतोभिधेयइतिविध्याश्रयत्वेपितद्भावात् । तथाचनिषेधग्रहणं व्यर्थमित्यर्थः । आश्रयासिद्धिप्रसंगेनैवतत्वप्रदीपिकाकारोक्तमिथ्यात्वनिर्वचनंनिरस्तमित्याह ॥ [3।3।] **एतेनेति** । स्वात्यंताभा वसमानाधिकरणमित्येवोक्तेव्याघातःस्यात् । भावतदत्यंताभावयोरेकाधिकरणत्वायोगात् । अतस्तथाप्रतीयमानमित्युक्तं । एवंचनव्याघातः । भावाधिकरणतयाभ्रांतिसिद्धस्यवस्तुतोभावाधिकरणत्वस्योपपत्तेः । एवंचस्वाधिकरणतयाप्रती यमाननिष्ठात्यंताभावप्रतियोगित्वंमिथ्यात्वमितिबोद्धव्यं ॥ [3।3।] **तदेतदिति** । अभावप्रतियोगित्वंस्वरूपेणयदितदासत्त्वाप

क्तिः । शशविषाणादेरपिस्वरूपेणात्यंताभावप्रतियोगित्वातिरिक्तासत्त्वाभावात् । यदित्वसद्विलक्षणस्वरूपानुपमर्देनस त्वाकारेणतदानिर्वचनीयत्वापत्तिरित्यर्थः ॥ **तथागतंमतमनुसृत्येति** । परेणनिरुपाख्यस्याश्रयत्वमुपपाद्यस्वोक्तार्थेतदुक्तं। विधानंप्रतिषेधंचमुक्त्वाशाब्दोस्तिनापरः। व्यवहारःसचासत्सुनेतिप्राप्तात्रमूकतेतिधर्मकीर्तिसम्मतिकथनादित्यर्थः॥ **तथात्व इति** । अप्रतीतेधर्मिणिकस्यापिनिषेद्धुमशक्यत्वात् । निरुपाख्येधर्मिणिकिंचिन्निषेधतातत्प्रतीतिर्वाच्या । नचवक्तुंशक्या । निरुपाख्यस्यख्यात्ययोगादित्यर्थः ॥ ७ ॥ इतिप्रतिज्ञाखंडनपंचिकाविवरणं ॥ ७॥ **अथावसरविचारइति** । सतिप्रतिप्र माणेऽनुमानानुदयात्तदभावलक्षणावसरोप्यनुमित्सताविचार्यतइत्यर्थः । लिंगवचनंहेतुः । तच्चसिद्धमेवेतिकथमसिद्धोहेतुरि त्याचार्येणोक्तमित्यतआह॥ **हेतुरितितदर्थइति**। मुख्यार्थसंबंधरूपलक्षणाबीजमुच्यतइतिवचनवृत्तिंचकथयतोयमभिप्रायः। धूमोहेतुरित्यादिप्रयोगदर्शनालिंगंहेतुशब्दवाच्यमितिकृत्वात्रापिवचनवृत्त्यालिंगंहेतुशब्देनोच्यते । यदितुकश्चिद्ब्रूयात्प्रतिज्ञा हेतूदाहरणानीत्यादौहेतुशब्दस्यलिंगवचनेप्रयोगात्सएवहेतुशब्दार्थः । धूमोहेतुरित्याद्यपिलक्षणयोपपन्नमिति । तदाप्रकृतेपि लक्षणयैवलिंगंहेतुशब्देनप्रतिपाद्यतामिति । यद्वोच्यतइतिप्रतिपादनमात्रंविवक्षितंनाभिधावृत्तिः। अथवातदर्थइतिनलक्षणा बीजंकथ्यतेकिंतर्हिवचनस्यसिद्धत्वेपितदर्थोहेतुरसिद्धइत्यसिद्धिरिति । असिद्धस्यहेत्वाभासत्वेनहेतुत्वाभावादसिद्धोहेतुरिति कथमुक्तमित्यतआह ॥ **परेणेति ॥ तत्रदृश्यत्वस्येति** । हेतोरेवसाध्यशून्यतयाविपक्षत्वेनतत्रहेतुवृत्तौअनैकांतिकतेत्यर्थः॥ **अवृत्ताविति** । दृश्यत्वेदृश्यत्वस्यावृत्तौदृश्यत्वहेतोर्ज्ञानाविषयतयाऽज्ञानासिद्धिस्स्यादित्यर्थः ॥ **तत्राप्येतदेवोत्तरमि**

ति । अनिर्वचनीयदृश्यत्वरूपविशेषस्यात्यंताभावंप्रतिपादयताऽनिर्वचनीयासिद्धेरेवेत्यनेनग्रंथोनार्थात्तदनुग तसामान्याभा वस्यापिप्रतिपादितत्वादित्यर्थः ॥ ¥१११ **नचासिद्धाश्रयंसामान्यंसिद्धंभवतीति** । यद्यसिद्धाश्रयंसामान्यंसिध्येत् तदावंध्यासु तेपिसुतत्वंबाष्पारोपितधूमेपिधूमत्वंचस्यात् । नचतद्युक्तं । मातृजन्यत्वविशेषस्याग्निव्याप्यत्वविशेषस्यचतत्रायोगात् । अथ वह्निव्याप्यताविशेषःसत्यधूमत्वं । धूमत्वमात्रंतुधूमतयाप्रतीयमानत्वंतथाव्यवह्रियमाणत्वंवा । तच्चतत्राप्यस्तीतिचेत् । धूमतयेत्यत्रधूमशब्देनकिंवह्निव्याप्यतोच्यते । किंवाधूमतयाप्रतीयमानत्वादिः । आद्येसैवधूमतास्यात् । द्वितीयेधूमताश ब्देनकिंवह्निव्याप्यतेत्यादिपूर्वोक्तविकल्पापर्यवसानादनवस्थास्यात् । किंचप्रकृतेपितर्हिदृश्यत्वमात्रंतथाव्यवह्रियमाणत्वंवा च्यं । नचवक्तुंशक्यं । आत्मनोपिदृश्यतयामयाव्यवह्रियमाणत्वादितितात्पर्यं ॥ ¥११२ **दृग्जन्यफलाश्रयत्वमिति** । अंतःकर णवृत्तिरूपदृग्जन्यज्ञाततांशब्दवाच्यमभिव्यक्तस्फुरणसंबंधरूपंयत्फलंतदाश्रयत्वमित्यर्थः ॥ **वृत्तिव्याप्यत्वस्येति** । अंतः करणवृत्तिविषयत्वस्येत्यर्थः ॥ ¥११३ **साधारणस्येति** । फलव्याप्यवृत्तिव्याप्यानुगतस्यव्यवहारविषयतालक्षणदृश्यत्वसामान्य स्येत्यर्थः ॥ ¥११३ **अंगीकृतत्वेनेति** । प्रमाणजनितांतःकरणवृत्तिव्याप्यत्वेनविषयतांगीकारइतिपरेणवृत्तिव्याप्यतारूपविशेष स्यांगीकृतत्वाद्विशेषस्यसामान्यंविनाऽयोगादर्थांतरस्याप्यंगीकृतत्वादित्यर्थः । ज्ञाततामंगीकुर्वतोपिवादिनोभागासिद्धोहेतु रित्येतदर्थपरतयादृश्यत्वाभावादित्येतद्व्याचष्टे ॥ ¥११३ **ज्ञाततांगीकारेपीति** ॥ ¥११४ **तेनाश्रयासिद्धीति** । आश्रयासिद्धःपक्ष इत्यत्रबाधरूपःप्रतिज्ञादोषउक्तः । अत्रत्वाश्रयशून्यतालक्षणंहेतुदूषणमुच्यतइतिनपौनरुक्त्यं ॥ ¥११५ **सामान्यविशेषभा**

वेनेति । यथाशिंशुपात्वंवृक्षत्वसामान्येहेतुः । तेनतदनुमानदर्शनात् । तथादृश्यत्वाभावरूपोविशेषोसिद्धत्वसामान्येहेतुः । सामान्यविशेषभावश्चासिद्धत्वस्यशब्दपक्षीकारेणप्रयुक्तचाक्षुषत्वादावपिभावात् । दृश्यत्वाभावस्यतुदृश्यत्वमात्रसंबंधित्वादितिभावः । अन्येतुदृश्यत्वस्यस्वरूपेणाभावोहेतुः । तस्यहेतुत्वाकारेणाभावोहेतुमानितिव्याचक्षते । पक्षांतरमाह ॥ व्यवहारोवेति । असिद्धत्वंहेतुःअसिद्धइतिव्यवहारःसाध्यइतितयोर्भेदइत्यर्थः ॥ व्याप्तिभंगभेदादिति । साध्याभावमात्रसंबंधसाध्यतदभावसंबंधानुभयसंबंधरूपाणांव्याप्तिभंगानांक्रमेणविरुद्धादिनिष्ठत्वात् विरुद्धादयोव्याप्तिभंगविशेषवंत इत्यर्थः । यद्वाविरुद्धादिशब्दानांभावप्रधानत्वाद्विरुद्धत्वादयोव्याप्तिभंगविशेषाइत्यर्थः ॥ तत्रविरुद्धइत्यादि । विरुद्धस्य स्वव्यापकोयःसाध्याभावःतन्निश्चायकत्वाद्विपरीतनिश्चयजनकत्वं । अनैकांतिकस्यस्वसहचरितसाध्यतदभावलक्षणकोटिद्वयस्मरणद्वारासंशयहेतुत्वं । अनध्यवसितस्यतुसाध्यासहचरितस्यतदबोधकत्वमित्यर्थः ॥ दुष्टत्वक्रमेति । लोकेहि कर्तव्याकरणमकर्तव्यकरणंचेतिदोषः । प्रकृतेचकर्तव्यासाध्यप्रमा । अकर्तव्यातदप्रमातदभावप्रमाच । तत्रानध्यवसितस्य कर्तव्याकरणमात्रं । इतरयोश्चाकर्तव्यकरणविशिष्टं । तत्राप्यनैकांतिकजन्यासंशयरूपाचाप्रमासाध्यमप्यवलंबते । विरुद्धजन्यासाध्याभावनिश्चयरूपाप्रमानसाध्यगंधंसहतइतिविरुद्धस्यातितरांदुष्टत्वमनैकांतिकस्यातिदुष्टत्वंअनध्यवसितस्यदुष्टत्वमात्रमितिक्रमइत्यवगंतव्यं । अन्येतुविरुद्धोविपरीतनिश्चयमित्यस्यग्रंथस्यविरुद्धसाध्याभावव्याप्तत्वात् साध्याभाववतिसाध्यविषयकविपर्ययंजनयतीत्यर्थः । अनैकांतिकश्चसंदेहमित्यादिपूर्वोक्तएवार्थइतिवदंतस्तदनुसारेणदुष्टत्वक्रमेत्ये

तमपिग्रंथं विरुद्धस्यविपर्ययजनकत्वादतितरांदुष्टत्वं अनैकांतिकस्यसंदेहजनकत्वादतिदुष्टत्वं अनध्यवसितस्तुज्ञानमेवनज
नयतीतितस्यदुष्टतामात्रमितिव्याचक्षते ॥ **अनध्यवसितविशेषस्येति** । अविद्यमानसपक्षविपक्षस्यसर्वमनित्यंस
त्त्वादित्यादेर्विद्यमानविपक्षस्याविद्यमानसपक्षस्यसर्वकार्यप्रधानान्वितंकार्यत्वादित्यादेरनध्यवसितस्येत्यर्थः । भूर्नित्यागंध
वत्त्वादितिविद्यमानसपक्षानध्यवसितव्युदासायविशेषग्रहणं । परेणविरुद्धतापरिहारानुपयोगितयापश्चादाशंकितमपिस
पक्षसद्भावंसपक्षाभावादितिमूलग्रंथोक्तसपक्षाभावरूपहेतोरसिद्धिकथनार्थत्वेनअत्यंतमूलग्रंथविरोधितयाप्रथमंनिषेधति ॥
यावंतोहीति । विपरीतव्याप्त्याविरुद्धइत्याचार्येणविपरीतव्याप्त्युपपादनायसपक्षाभावउक्तोनतुविरुद्धलक्षणतयेतिभा
वः ॥ **वक्ष्यतीति** । तथाचतेनास्यशुक्तिरूप्यादेर्दृश्यत्वमंगीकृत्यप्रवृत्तस्यविरोधइतिशेषः ॥ **तथाचेति** । तदसंबं
धित्वेसतितदभावसंबंधिनस्तदभावव्याप्तिरितिनियमाद्विपरीतव्याप्तिसिद्धिरितिभावः ॥ **वाच्यनैकांतिकोवेति** । वस्तु
तःसपक्षाभावेपिपरेणसपक्षस्यतस्मिंश्चहेतुवर्तनस्यचांगीकृतत्वादित्यर्थः । तर्हिपरेणविपक्षवृत्तित्वस्यानंगीकारात्ननतद्रीत्यानै
कांतिकत्वमित्याशंक्ययुक्तिबलात्परेणतदंगीकार्यमित्याह ॥ **आत्मनीति** ॥ **एतेनेति** । विरुद्धानैकांतिकत्वयोःपक्ष
भेदेनव्यवस्थितत्वेनलक्षणविरोधःसाध्यतदभावसंबंधतदभावमात्रसंबंधगर्भयोरनैकांतिकविरुद्धलक्षणयोर्विरोधःपरिहृतइत्य
र्थः । आत्मनःस्वप्रकाशतामुपपादयितुंप्रकाशमात्रंतावदुपपादयति ॥ **ममेदमिति** । ममेदमनुकूलमित्यादिज्ञानस्या
हमर्थविशिष्टानुकूलादिवस्तुप्रकाशत्वेनावच्छेदकात्मप्रकाशोंगीकार्यः । दंड्यादिलक्षणावच्छिन्नप्रकाशस्यदंडादिलक्षणावच्छे

दकप्रकाशसाहित्यनियमदर्शनादित्यर्थः । एवमात्मनःप्रकाशमात्रमुपपाद्यतस्यापराधीनप्रकाशत्वसिद्धयेनैयायिकांगीकृतां मानसवेद्यतांतावन्निषेधति ॥ **तस्येति** । आत्मनोमनोजन्यस्वनिष्ठज्ञानवेद्यत्वेस्वनिष्ठक्रियायाःस्वस्मिन्विषयेवृत्तिराप द्येत । साचायुक्ता । देवदत्तगतायागतेस्तद्विषयत्वादर्शनादित्यर्थः । नन्वस्त्वात्मनोमानसवेदनीयत्वाभावः । तथा प्यपराधीनतात्मप्रकाशस्यकुतः । ज्ञानाश्रयत्वेनाप्यात्मनःप्रकाशोपपत्तेरितिप्राभाकरमतमाशंक्यनिरस्यति ॥ **संवित्कर्म तामिति** । अयमर्थः । आत्मानसंविदधीनप्रकाशःसंवित्कर्मतामंतरेणापरोक्षत्वात् संवेदनवत् । घटादौधर्माधर्मादौचव्य भिचारपरिहारार्थंचहेतुगतंविशेषणद्वयं । नचनैयायिकादीन्प्रतिविशेषणासिद्धिः । संवित्कर्मत्वेवृत्तिविरोधस्योक्तत्वात् । नचनिदर्शनस्यसाध्यवैकल्यं । संविदःसंविदंतराधीनप्रकाशत्वेऽनवस्थानादिति । परिहरति ॥ **तत्रेदमिति** । आद्यंदूष यति ॥ **आद्येइति** । निरुपाधिकस्यैवापराधीनप्रकाशत्वे ममेदमित्यादिनानुकूल्यादिविशिष्टस्यांतःकरणसपिंडितचैतन्य रूपस्याहमर्थस्यस्वयंप्रकाशत्वसाधनमसंगतमित्यर्थः । द्वितीयंदूषयति ॥ **द्वितीयेइति** । निरुपाधिकरूपवत्सोपाधिकरूपस्या प्यपराधीनप्रकाशत्वांगीकारे आत्मनिज्ञानमात्रंनिषिद्धंस्यात् । तथाचापसिद्धांतःस्यात् । सर्वप्रत्ययवेद्येचब्रह्मरूपेव्यवस्थि ते । प्रपंचस्यप्रविलयःशब्देनप्रतिपाद्यतइतिमंडनमिश्रादिभिस्तस्यवेद्यताभिधानादित्यर्थः । दोषांतरमाह ॥ **किंचेति** । आत्मानपराधीनप्रकाशइत्येवंप्रकारकवृत्तिविषयोनवेतिविकल्पार्थः ॥ **स्वक्रियाविरोधेइति** । यथामूकोहमितिवच नक्रिययामूकपदोक्तवचननिषेधोविरुध्यते । तथात्मापराधीनप्रकाशोनेतिआत्मसंबंधित्वेनपराधीनप्रकाशत्वनिषेधकात्मवि

षयकज्ञानक्रिययानेतिपदोक्तस्तन्निषेधोविरुध्यतइत्यर्थः ॥ द्वितीयइति । यत्रमिथ्यात्वाभावस्तत्रदृश्यत्वाभावइतिव्यतिरेकोस्तिनवा । आद्येआत्मन्येवसदर्शयितव्यः । अत्यंतासतिसद्विविक्तत्वरूपमिथ्यात्वस्यपराधीनप्रकाशत्वरूपदृश्यत्वस्यचसद्भावेनतत्रव्यतिरेकासंभवात् । नचात्मनिशक्योदर्शयितुं । आत्मानपराधीनप्रकाशइतिपराधीनप्रकाशत्वरूपदृश्यत्वस्यचसाधनाभावविषयकज्ञानंप्रत्यात्मनोविषयत्वाभावेनतन्निष्ठतयाव्यतिरेकस्यज्ञातुमशक्यत्वात् । द्वितीयेसंदिग्धानैकांतिकता । साध्याभाववतिसाधनाभावनियमानिश्चयेनतत्रसाधनसंदेहादित्यर्थः । नन्वात्मानपराधीनप्रकाशइतिवृत्तिविषयइत्याद्यःपक्षोंगीक्रियते । तर्हिदृश्यत्वंस्यादितिचेत् किंनिरुपाधिकस्यकिंवासोपाधिकस्य । नाद्यः । अपराधीनप्रकाशत्वविशिष्टस्यैवतत्रस्फुरणान्निरुपाधिकस्यतत्रास्फुरणात् । नद्वितीयः । सोपाधिकस्यदृश्यत्वांगीकारादिति । चोदयति ॥ नन्विति । निरुपाधिकरूपमेवापराधीनप्रकाशंसोपाधिकंतुतदेवरूपंपराधीनप्रकाशमपीत्यपिशब्दोयोज्यः । एवंचनिरुपाधिकस्यापराधीनप्रकाशत्वेपिदृश्यत्वाभावावच्छिन्नस्यदृश्यत्वात्सिद्धोव्यतिरेकइत्याह ॥ तेनेति । तत्रेदंयक्तव्यं । किंसोपाधिकेव्यतिरेकःप्रदर्श्यतेकिंवानिरुपाधिके । आद्येसोपाधिकंसत्यंमिथ्यावा । आद्यंदूषयति ॥ नव्यतिरेकावच्छिन्नस्येति । व्यतिरेकावच्छिन्नस्यादृश्यत्वेतन्निष्ठतयाव्यतिरेकस्यज्ञातुमशक्यत्वात् । सत्यस्यदृश्यत्वावश्यंभावाद्व्यभिचारइत्यर्थः । द्वितीयंदूषयति ॥ मिथ्यात्वइति । अनेनदृश्यत्वरूपसाधनस्यव्यतिरेकेणकिमपिमिथ्यात्वरूपसाध्यव्यतिरेकाभावेनव्यतिरेकव्याप्तेरदर्शितत्वादित्यर्थः ॥

भागासिद्धिरिति । सोपाधिकस्यमिथ्यात्वेतस्यापिपक्षीकर्तव्यतयादृश्यत्वस्यतत्रावृत्तौभागासिद्धिरित्यर्थः । एवंविशिष्टस्य मिथ्यात्वात् विशिष्टेसाध्यव्यतिरेकोनास्तीत्युक्तं । इदानींसाधनव्यतिरेकोवातज्ज्ञानंवात्याज्यं । साधनव्यतिरेकोहि सोपाधिक स्यदृश्यत्वव्यतिरेकावच्छिन्नत्वमपेक्षते । सोपाधिकावच्छिन्नतयासाधनव्यतिरेकज्ञानंतुसोपाधिकस्यदृश्यत्वमपेक्षते । नच दृश्य त्वव्यतिरेकावच्छिन्नत्वदृश्यत्वयोरेकत्रावस्थानंयुक्तं। विरोधात् । एवंचव्यतिरेकावच्छिन्नस्यस्यादेवदृश्यतेतिआनंदबोधोक्तिश्च व्याहतेत्याह ॥ दृश्यत्वव्यतिरेकेति । ननुभावाभावयोःसामानाधिकरण्येहिविप्रतिषेधःस्यात् । नत्वेतदस्ति । स्वरूपमात्रेदृ श्यत्वाभावःस्वरूपमात्राद्भिन्नेदृश्यत्वव्यतिरेकावच्छिन्नेदृश्यत्वमित्यधिकरणभेदांगीकारादितिचेत् मैवं । दृश्यत्वव्यतिरेकाश्र यस्यदृश्यत्वव्यतिरेकावच्छिन्नतयादृश्यतासिद्ध्यर्थंदृश्यत्वव्यतिरेकदृश्यत्वयोःसामानाधिकरण्यस्यावश्यकत्वात् । अन्यथाए कत्रव्यतिरेकःअपरत्रदृश्यत्वव्यतिरेकाभावइत्युक्तौयत्रव्यतिरेकमात्रंतत्रस्वरूपमात्रसिद्धावपितदवच्छिन्नतयाव्यतिरेकज्ञाना संभवः । नहितस्याज्ञानेतदवच्छिन्नतयाकिंचिज्ज्ञातुंशक्यं । यत्रदृश्यत्वमात्रंतत्रतद्व्यतिरेकस्यैवअसंभवइतिदूरेतदवधारण मिति । श्रुतिभिरपिसर्वथादृश्यत्वंनिषिध्यतेचेत्ब्रह्मसंबंधित्वेनैवतन्निषेद्धव्यं । नचब्रह्मणोज्ञानेतत्रदृश्यत्वंनिषेद्धुंशक्यं । अज्ञातेधर्मिणिधर्मनिषेधायोगात् । एवंचसर्वथादृश्यत्वनिषेधेव्याघातादेवान्यपरत्वंतासामित्याह ॥ अंतएवेति । एवंता वदवच्छिन्नस्यदृश्यत्वेनतन्निष्ठतयाव्यतिरेकस्यशक्यज्ञानत्वेपिअवच्छिन्नस्यमिथ्यात्वाद्दृश्यत्वाच्चसाध्यसाधनयोर्व्यतिरेकस्य रूपमेवतत्रनसंभवतीतिसोपाधिकेव्यतिरेकःप्रदर्श्यतइतिपक्षोदूषितः । इदानींनिरुपाधिकेव्यतिरेकःप्रदर्श्यतइतिपक्षंदूषयति।

निरुपाधिकइति । निरुपाधिकस्यात्मनःसत्यत्वेनतत्रसाध्यव्यतिरेकस्यादृश्यत्वेनसाधनव्यतिरेकस्यचस्वरूपतःसद्भावेपि निरुपाधिकस्यादृश्यतयातन्निष्ठत्वेनव्यतिरेकनिश्चयोनसंभवतीतितत्रतन्निश्चयंवदतातस्यदृश्यत्वंवक्तव्यमित्यनैकांतिकत्वमि त्यर्थः । अत्रकेनचित्प्रलपितं । स्वयंप्रकाशत्वेनप्रकाशमानेआत्मनि यतोवाचोनिवर्ततइत्यादिवाक्यादृश्यत्वाकारावुद्धिरु त्पद्यते । तस्यांचाभिव्यक्तोदृगात्मास्वाध्यस्तंदृश्यत्वाभाववैशिष्ट्यंसाधयति । एवंचात्मस्वरूपेदृश्येपिदृश्यत्वाभाववैशिष्ट्यं दृश्यंभविष्यति । नचवाच्यंदृश्यत्वाभाववैशिष्ट्यस्यमिथ्यात्वेदृश्यत्वंवास्तवंस्यादिति । स्वप्नेभावतद्विपर्यययोरध्यस्ततादर्श नादिति । तत्तुच्छं । तथाहि । अदृश्यत्वाकारबुद्धिः किमात्मावच्छिन्नमदृश्यत्वंबोधयत्युतानवच्छिन्नं । आद्येअवच्छेदका त्मनोपिज्ञानंस्यात् । द्वितीयेकथंदृश्यत्वाभावविशिष्टस्यात्मीयतासिद्धिः । वाक्यादुत्पन्नायाश्चवृत्तेरध्यस्तदृश्यत्वविषयकत्वेन कथंवाक्याप्रामाण्यापातः । किंचैवमारोपितोदृश्यत्वव्यतिरेकः आत्मनीवप्रपंचेप्यस्तीत्यसिद्धिः । प्रपंचेदृश्यत्वमारोपितमस्ती तिनासिद्धिरितिचेत्तर्ह्यात्मन्यप्यध्यस्तंतदस्तीतिव्यभिचारः । किंचदृश्यत्वाभावस्याध्यस्तत्वेतदभावरूपेणदृश्यत्वेनबाधगोच रेणभवितव्यं । बाधविषयस्यचाध्यस्तत्वेबाधस्याप्रामाण्यप्रसंगात्सत्यतासिद्धिः । अतएवस्वप्नदृष्टांतोप्यसंप्रतिपन्नइत्यलंदुर्बल हिंसया । प्रकारांतरेणाप्यात्मनोदृश्यत्वमुपपादयति ॥ एवमिति ॥ सोपाधिकेति । मिथ्याभूतसोपाधिकविषयभ्रांति ज्ञानस्याविद्यानिवर्तकत्वायोगादित्यर्थः । व्यतिरेकावच्छिन्नस्यस्यादेवदृश्यतेतिपरोक्त्यैवावच्छेद्यस्यात्मनोपिदृश्यतामुपपा दयति ॥ किंचेति ॥ शुद्धेनरूपेणेति । विशेषणानवच्छिन्नस्वरूपेणेत्यर्थः । अत्रप्रष्टव्यं । किंज्ञानविषयत्वमात्रंदृश्यत्वं

किंवाशुद्धेनरूपेणज्ञानविषयत्वं । आद्यंदूषयति ॥ **मादृशीति** ॥ **सोपीति** । यद्यप्यवच्छेद्यस्यात्मस्वरूपस्यपरेणसत्यत्वमंगीक्रियते । अन्यथाशून्यवादप्रसंगात् । तथाप्यनैकांतिकतापरिहाराभिनिविष्टचेतसोविस्मृतसिद्धांतस्येदंचोद्यमितिबोद्धव्यं । सोपिमिथ्याचेत्साध्यव्यतिरेकाभावेन । तथापिशुद्धेनरूपेणनदृश्यतइतिवाक्यप्रतिपादितंदृश्यत्वव्यतिरेकावधारणं निष्प्रयोजनमित्याह ॥ **तर्हीति** । द्वितीयंदूषयति ॥ **अपिचेति** । एवमपिचबुद्धिस्थद्वितीयपक्षांगीकारेपिचघटादेरपिघटत्वाद्यवच्छेदेनदृश्यत्वाद्यंगीकारात्स्वरूपेणैवदृश्यत्वंभागासिद्धमित्यर्थः । ननुघटादेःसर्वस्यापि यत्किंचिद्विशेषणावच्छेदेनैवप्रतीयमानतयासंपूर्णासिद्धिसंभवेकिमितिभागासिद्धिरुक्ता । नचैवंघटत्वादेरवच्छेदकस्याप्यवच्छेदकांतरावच्छेदेनप्रतीतावनवस्थाप्रसंगः । घटाद्यवच्छेदकंघटत्वादिकंप्रतितदवच्छेद्यस्यघटादेरेवावच्छेदकतयावच्छेदकांतरानपेक्षणात् । विशिष्टज्ञानेहिविशेषणविशेष्येपरस्परावच्छिन्ने प्रतीयेतेइतिचेत्सत्यं । तथापिनिर्विकल्पकवादेगोत्वादेरेकदापिविशेषणांतरावच्छेदेनाप्रतीतेः तदभ्युपगमेनभागासिद्धिरुक्तेत्यदोषः ॥ **दर्शनप्रतियोगितामात्रमिति** । वृत्तिज्ञानंप्रतिविषयतयासंबंधित्वमात्रमित्यर्थः । आत्मनोपिस्वव्यवहारेस्वरूपसंविदपेक्षा नियतेत्यतउक्तंस्वातिरेकीति । कदाचित्तस्यैवाद्वितीयत्वादिव्यवहारेएकमेवाद्वितीयमित्यादिवाक्यजन्यवृत्तिसापेक्षत्वान्नियतिग्रहणं । किंव्यवहारशब्देनविशिष्टव्यवहारोविवक्षितः। स्वरूपमात्रव्यवहारोवेतिविकल्पंहृदिनिधायाद्यंप्रत्याह॥ **स्वप्रकाशत्वेति** । स्वप्रकाशत्वादिव्यवहारेऽत्रायंपुरुषःस्वयंज्योतिरित्यादिवाक्यजन्यवृत्तिसापेक्षत्वादनैकांतिकतेत्यर्थः । सोपाधिकात्मविषयविशिष्टव्यवहारे उपाध्युपनायकप्रमाणापेक्षानियमेपिनस्वरूपमात्रव्यव

रादितिद्वितीयमाशंकते॥ **औपाधिकेति॥ सुषुप्त्यादाविति**। सुषुप्तिमूर्छादौस्वरूपमात्रस्फुरणापरपर्यायाभिज्ञारूपोव्यवहारोस्तीत्यर्थः॥ **तर्हितंतएवेति**। परामर्शस्यसुखकालादिविशिष्टविषयतयातन्मूलाभिज्ञायाअपितद्विषयकत्वंवाच्यं।तयोःसमानविषयकत्वनियमादित्यर्थः॥ **अन्यस्त्वाहेत्यादि**।फलव्याप्यत्वाभावेहेतुरनाधेयातिशयत्वादिति। तत्रहेतुःप्रकाशरूपइति। यथा घटादौतदाकारवृत्त्यास्फुरणरूपोऽतिशयआधीयतेनैवमात्मनि। तस्यैवस्फुरणरूपत्वादित्यर्थः।परेणापिपरोक्षवृत्तौनतदाधेयंस्फुरणमंगीकृतं। परोक्षवृत्तेरेवतत्रज्ञानत्वाभ्युपगमात्। अन्यथास्फुरणस्यापरोक्षैकरसत्वेनाभिव्यक्तापरोक्षैकरसस्फुरणसंबंधेन परोक्षवृत्तिविषयस्याप्यतीतादेरपरोक्षत्वप्रसंगः । एवंचपरोक्षवृत्तेरिवापरोक्षवृत्तेरेवज्ञानत्वोपपत्तौतदाधेयस्फुरणमप्रामाणिकमितिअसिद्धोहेतुरितिभावेनाह ॥ **तदेतदिति ॥ अनिर्वचनीयासदन्यतरत्वानिस्तारादिति** । सद्विविक्तत्वस्यासद्विविक्तत्वेनविशेषितत्वविवक्षायांसद्विविक्तत्वमनिर्वचनीयत्वेंतर्भवति । अन्यथात्वसत्वइत्यर्थः ॥ **सत्त्वाभावइति** । सत्त्वस्य साधकताप्रयोजकत्वेनासाधनत्वमत्यंतासत्त्वइवसत्त्वाभावेप्यापततीतिभावः ॥ **व्याप्त्यभावादिति** । यत्रजगतोभावस्तत्रानुमानाभावइत्यत्रनिदर्शनादर्शनादित्यर्थः । यन्मिथ्यातत्समानयोगक्षेमंतदंतर्गतमपिमिथ्यायथासंप्रतिपन्नमितिव्याप्तिरस्तीतिपरिहरति ॥ **नैवंदिजगदिति** । पक्षांतरमाह ॥ **यदिदृश्यत्वमिति** । ननुव्याप्त्यभावस्तदवस्थः । यत्रजगन्मिथ्यात्वप्रतिपादकत्वंतत्रानुमानमिथ्यात्वप्रतिपादकत्वमित्यत्रनिदर्शनाभावादित्यतआह ॥ **अविशेषादिति** । यद्यत्साधनप्रयोजकविशिष्टंसद्यत्रास्तितत्तत्रतत्साधयति । यथासंमतमितिसामान्यव्याप्तिरस्ति । ततश्चजगतिवर्तमानतामात्रेणतन्मि

थ्यात्वप्रतिपादकंदृश्यत्वंस्वात्मनिवर्तमानंस्वमिथ्यात्वंसाधयेदित्यर्थः ॥ **तदिदमुक्तमितितर्कबाधितत्वेनेति** । तृतीय याव्यास्याद्यभावस्यासाधकत्वेद्वारत्वंकथयतानव्यास्याद्यभावमात्रपर्यवसानमितिसूचितमित्यर्थः ॥ **आवृत्तिर्न्यायाख्याय तइति** । तर्कबाधितत्वेनानध्यवसितःसाध्यासाधकइतिकृत्वानध्यवसितोनामहेत्वाभासइतिव्याख्यायतइत्यर्थः । केवलव्य तिरेकिणीत्यनेनैवपक्षएववर्तमानत्वेसिद्धेसाध्यासाधकतासिद्ध्यर्थंकेवलव्यतिरेकिणंविशेषणद्वयेनविशिनष्टि ॥ **बाधितेसत्प्र तिपक्षेचेति** ॥ **तथासतीति** । विरुद्धादेःसाध्याभावप्रतीत्यादिजनकत्वेनप्रतीत्यजनकत्वरूपसाध्यासाधकत्वविशेषणेनैव तद्व्युदाससिद्धेरित्यर्थः ॥ **एवंकारेति** । पक्षेवर्तमानग्रहणेनैवासिद्धावतिव्याप्तिपरिहारादित्यर्थः । तर्ह्येवकारस्त्यज्यतामि त्यतआह ॥ **तथाचेति** ॥ **सचसमइति** । सर्वमनित्यंसत्त्वादित्यादेर्हेतोःसाध्यासहचरितत्वात्प्रतीत्यजनकत्वं । दृश्यत्वस्य त्वसत्त्वात् । तथाचोपपादकभेदेपिप्रतीत्यजनकत्वंसमं । दृश्यत्वस्यासिद्धातिरिक्तत्वंतुत्वयैवाभ्युपेतमितिअनध्यवसितलक्षणं प्रकृतेपिविद्यतइत्यर्थः । ननुयद्यपिमयासिद्धातिरिक्ततेष्यते । तथाप्यसाधकत्वंतुनेष्यते । त्वयात्वसाधकत्वांगीकारेपिअसि द्धिबहिर्भावोनेष्यते । तथाचकथमनध्यवसिततेतिशंकते ॥ **असिद्धिबहिर्भावोस्यकथमिति** । किंदृश्यत्वहेतोरसिद्धिब हिर्भावोनास्तीत्युच्यते किंवासामान्यतोनध्यवसितमात्रस्य । नाद्यः । त्वयातस्यतत्रांगीकृतत्वेनत्वदंगीकारेकारणस्यपररीत्या दूषणमभिदधतामयावक्तव्यत्वेनमांप्रतितत्प्रश्नायोगात् । असाधकत्वस्यचत्वांप्रतिसाधनात् । द्वितीयेपिकिंलक्षणभेदोना स्तीत्युच्यतेकिंवोदाहरणभेदोनास्तीतिविकल्पंहृदिनिधायाद्यंदूषयति ॥ **इत्थंमिति** । सत्यपिलिंगेज्ञानजनकतालक्षणसामर्थ्य

यंपुर्यअनध्यवसितलक्षणमित्याह ॥ **यदासामर्थ्येति** । नद्वितीयइत्याह ॥ **प्रकृतेतर्कस्येति** । दृश्यत्वानुमानासाधकता साधकतर्कस्यासिद्धिपुरस्कारेणप्रवृत्तेर्दोषद्वयं । सर्वमनित्यंसत्त्वादित्यादौत्वसाधकत्वंनासिद्धिपुरस्कारेणप्रवर्ततइतितत्रान ध्यवसितत्वमेवास्ति नत्वसिद्धिरित्युदाहरणभेदसिद्धिरित्यर्थः। यद्वानन्वसिद्धिबहिर्भावोस्यकथमित्यादेर्ग्रंथस्यायमर्थः। ननुप क्षएववर्तमानःसाध्यसाधकोऽनध्यवसितइतिलक्षणेऽनध्यवसितस्यासिद्धिदूषकताबीजात्पक्षेवर्तमानत्वाद्भिन्नंपक्षादन्यत्रावर्त मानत्वंदूषकताबीजंसिध्यति । एवकारत्यागेतुनसिध्यति । तथाहि । अनध्यवसितस्यकिंपक्षेवर्तमानत्वंदूषकताबीजंकिंवाप्रती त्यजनकत्वरूपंसाध्यासाधकत्वं । यद्वापक्षेवर्तमानत्वविशिष्टंसाध्यासाधकत्वं । नाद्यः । तस्यसदनुमानसाधारणतयागुणत्वे नदूषकताबीजत्वाभावात् । नद्वितीयः । तस्यासिद्धसाधारण्यात् । नतृतीयः । इदंसाध्यप्रमितिजनकंनभवतिपक्षेवर्तमानत्वे सतिसाध्यप्रतीत्यजनकत्वादित्यसाधकतानुमानेव्यर्थविशेषणत्वात्। तस्मादेवकारत्यागेदूषकताबीजभेदासिद्धिर्नचदूषकताबी जभेदंविनाहेत्वाभासभेदसिद्धिरित्यनध्यवसितस्यासिद्धिबहिर्भावोनयुक्तइत्येवकारःकर्तव्यः । तथाचदृश्यत्वस्यनानध्यवसित ता। विपक्षेपिवर्तमानत्वस्यत्वयोक्तत्वादितिशंकते ॥ **असिद्धिबहिर्भावोस्येति** । परिहरति ॥ **इत्थमिति** । वादिप्रतिवादि नोरन्यतररीत्याहेतुस्वरूपाभावोसिद्धस्यदूषकताबीजंसाध्यप्रतीतिजननसामर्थ्याभावस्त्वनध्यवसितस्यदूषकताबीजमितिभेद सिद्धिरित्यर्थः। अन्यतरासिद्ध्यादावपिदूषकताबीजानुगत्यर्थंवादिप्रतिवादिनोरन्यतररीत्येत्युक्तं। नन्वनध्यवसितदूषकताबी जंहेतुस्वरूपासत्त्वंविनापिसिद्ध्यतिनवा। आद्येप्रकृतेपितथैवसिद्धुपपत्तेरनध्यवसितएवस्यात्।नत्वसिद्धइतिदोषद्वयानुपपत्तिः।

द्वितीयेसिद्धिरहितस्यानध्यवसितोदाहरणस्याभावात्सांकार्यमित्यतआह॥६।१।१५॥प्रकृतइति। प्रकृतानुमानेऽनध्यवसितदूषकतावीजं हेतुस्वरूपासत्त्वंविनानसिद्ध्यतीतिदोषद्वयं। सर्वमनित्यंसत्त्वादित्यादौनतथेतिनसंकीर्णतेति॥ ६।१।१७॥बहुलोर्ध्वतादिवदिति। यथा धूममात्रस्यशांताग्नावपिविद्यमानत्वेनबहुलतादिर्व्याप्त्युपयोगी । तथाभाससाधारणधूमस्यह्रदेव्यभिचाराद्यत्रानाभासोधूमस्त त्राग्निरितिव्याप्त्युपयोग्येवाभासविवेकइत्यर्थः । आभासविवेकस्यव्याप्त्युपयोगित्वेप्यारोपिताभासविवेकधूमवतिह्रदेव्यभि चारोदुर्वारः। आभासविविक्तएवाभासविवेकोव्याप्त्युपयोगीतिचेन्न । आभासविवेकवतोपिआभासविवेकस्यारोपितस्यतत्रवक्तुं शक्यत्वाद्व्यभिचारापरिहारात्। आभासविवेकविशेषणीभूताभासविवेकेनाप्याभासविविक्तेनभाव्यमितिचेत् । एवंतर्ह्याभास विवेकविशेषणपरंपरायाअपर्यवसितत्वेनजन्मशतेनापिहेतुरनिरूपितःस्यात्। किंचह्रदेनधूममात्रमप्यस्तिकिंतुतद्वतस्यवाप्यस्यत थाप्रतीतिरेव। नचभ्रांत्यनुसारेणार्थांगीकारोयुक्तः । भ्रांतेःप्रमाणत्वापातात्। नचास्माभिर्धूमवत्तयाप्रतीयमानत्वंहेतूकृतंकिं तुधूमवत्त्वं। ततोनाभासविवेकोव्याप्त्युपयोगीति। किंचारोपितदृश्यत्वस्यब्रह्मण्यपिसंभवाद्दृश्यत्वेपिव्याप्त्युपयोगितयैनाभास विवेकोंगीकार्यइतिपरिहारेस्थितेपिपरिहारांतरमाह ॥ ६।१।१८॥ तदवक्तव्यमिति ॥ ६।१।२०॥ प्रतिबिंबाद्यसत्यतासिद्धेरिति । छाया वत्प्रतिध्वनिप्रतिसूर्यवच्चप्रतिबिंबादेःसत्यत्वादितिभावः। अर्थावच्छिन्नंज्ञानमंगमितिपक्षोस्तु । तथात्वेवच्छेदकार्थस्यापिमि ध्यांगत्वंस्यादितिचेत् । किमवच्छिन्नस्ययद्भवतितदवच्छेदकस्यापिभवतीतिसामान्यव्याप्तिः । किंवावच्छिन्नस्यहेतुत्वेऽवच्छेद कस्यापिहेतुत्वमितिविशेषव्याप्तिः। नाद्यः। ब्रह्मज्ञानस्यवेदांतसाध्यत्वेपित्वयापिब्रह्मणस्तत्साध्यतानभ्युपगमात्। नद्वितीयः।

ब्रह्माज्ञानस्यजगदुपादानत्वेब्रह्मणोपितत्प्रसंगात्। निर्विकारेचतस्मिंस्तस्यायोगात्। आत्मज्ञानस्याविद्यानिवृत्तिहेतुत्वेआत्मनोऽप्यविद्यानिवृत्तिहेतुत्वप्रसंगाच्च। तस्यचाज्ञानस्फोरकत्वेनतदनिवर्तकत्वात्। नन्वथापिज्ञेयस्यज्ञानव्यावर्तकत्वाद्व्यावर्तकत्वस्यचव्यावृत्तिज्ञानहेतुत्वात्मकत्वादारोपितस्यापिहेतुतासिद्धिरितिचेत्। स्यादेतदेवं। यदिव्यावृत्तिज्ञानहेतुत्वंव्यावर्तकत्वंस्यात्। नचैवं। किंतुव्यावृत्तिज्ञानहेतुज्ञानविषयत्वमेवव्यावर्तकत्वं। कुतएतत्। सत्यपिदंडेदंडाज्ञानेव्यावृत्त्यज्ञानात्। मयाचारोपितस्यहेतुतानभ्युपगमेपिव्यावृत्तिधीहेतुभूतज्ञानविषयत्वस्याभ्युपगतत्वेनारोपितस्यव्यावृत्तिज्ञानहेतुज्ञानविषयत्वापरपर्यायव्यावर्तकतोपपत्तेः। नन्ववच्छेदकस्यारोपिततयातदवच्छिन्नमप्यारोपितमेवेतिपुनरप्यारोपितस्यहेतुताप्राप्तेतिचेन्न। अज्ञानस्यावच्छेदकस्यानिर्वचनीयत्वेपितदवच्छिन्नाज्ञानहानेर्ब्रह्माभिन्नायाःपंचमप्रकारायावासदसद्वैलक्षण्यलक्षणानिर्वचनीयत्वाभावात्। द्वैतस्यासत्यत्वेपितदवच्छिन्नस्यद्वैताभावरूपस्याद्वैतस्यासत्यतायास्त्वयानभ्युपगमाच्च। तत्रज्ञानद्वैतेतटस्थेइतिचेत्। अत्रापिज्ञेयंतथेत्यवच्छिन्नंपक्षमाश्रित्यकेचित्परिहरंति। स्वयंत्वनवच्छिन्नंपक्षमेवाश्रित्याह॥ [६।२३] नदोषेति। अयमर्थः। अर्थावच्छिन्नमेवसुषिरज्ञानंहेतुः। नचासुषिरज्ञानस्यापिहेतुताप्रसंगः। विषयावच्छेदमंतरेणधर्मांतरेणैवासुषिरज्ञानाद्व्यावृत्तेः। तथाहि। साकिंसत्यसुषिरज्ञानस्यनेत्युच्यतेकिंवाऽसत्यसुषिरज्ञानस्य। नाद्यः। सत्यसुषिरज्ञानमसत्यसुषिरज्ञानाद्व्यावर्तकधर्मोपेतंततोव्यावृत्तत्वात्संमतवदितितदनुमानात्। नचविषयेणार्थांतरता। तस्यतद्धर्मत्वात्। नापिविषयसंबंधेन। ज्ञानज्ञेययोःसंयोगादेरसंभवात्। स्वरूपप्रत्यासत्तेश्चज्ञानस्वरूपानतिरिक्तत्वेनतद्व्यावर्तकत्वायोगात्। किंचसत्यसुषिरज्ञानं

विषयोपाधिमनपेक्ष्यासुषिरज्ञानाद्विलक्षणंतज्जनकविलक्षणजनकजन्यत्वात् । परोक्षज्ञानजनकविलक्षणजनकजन्यापरोक्ष ज्ञानवन्नचासिद्धिः । असुषिरज्ञानजनकोयोऽसुषिरेंद्रियसंयोगःतद्विलक्षणसुषिरेंद्रियसंप्रयोगजन्यत्वात्सुषिरज्ञानस्य । नच दृष्टांतस्यसाध्यवैकल्यं । एकविषययोरपिपरोक्षत्वापरोक्षत्वलक्षणवैलक्षण्यदर्शनेनापरोक्षत्वस्यविषयोपाधिकत्वाभावात् । न चविलक्षणजनकजन्यत्वंसुषिराख्यविषयसंबंधरूपवैलक्षण्येनैवोपपन्नमितितदतिरिक्तवैलक्षण्यसाधनेऽप्रयोजकता । यवबी जविलक्षणकलमबीजजन्यत्वस्यापिकदाचिद्देवदत्तादिसंबंधरूपवैलक्षण्येनैवोपपत्त्याकलमबीजजन्यांकुरस्ययवबीजांकुरात्स्व तोवैलक्षण्यरूपकलमांकुरत्वस्यकदाचिदभावप्रसंगात् । अपिचसत्यसुषिरज्ञानमसुषिरज्ञानादन्यसंबंधमनपेक्ष्यविलक्षणंअसु षिरज्ञानजनितार्थक्रियाविलक्षणार्थक्रियाकारित्वात्यवबीजात्कलमबीजवत् । नचसुषिरसंबंधरूपवैलक्षण्येनैवविलक्षणार्थ क्रियाकारित्वोपपत्त्यास्वतोवैलक्षण्येऽप्रयोजकता । तथात्वेदेवदत्तसंबंधेनविलक्षणस्ययवबीजस्यकदाचित्कलमांकुरोत्पादक त्वप्रसंगात् । नन्वेवंघटाभावस्यापिघटसंबंधमनपेक्ष्यैवपटाभावादिभ्योवैलक्षण्यंस्यादितिचेत्स्यादेव । अन्यथापटसंबंधेनापि विलक्षणंनस्यात् । नहिस्वतोऽविलक्षणमन्यसंबंधमात्रेणविलक्षणंभवति । एकस्यैवसत्तादेरीश्वरज्ञानादेश्चविलक्षणानेकसंबंधेन वैलक्षण्यप्रसंगात् । एकस्यैवदृशोऽनेकदृश्यसंबंधेनवैलक्षण्यापाताच्च । देवदत्तादेरपिनदंडादिनावैलक्षण्यंकिंतुस्वतएव । दं डादिनातुदंड्यादिरूपंविशिष्टाख्यंवस्त्वंतरमेवोत्पद्यतइतिनकश्चिद्दोषः । काकातिरेकेणगृहेसंस्थानविशेषवत्क्षीरसंबंधातिरेके णक्षीरमाधुर्यगुडादिमाधुर्याद्वैलक्षण्यवच्चघटसंबंधातिरेकेणघटाभावस्यापिपटाभावादितोविलक्षणस्वभावविशेषस्यघटनिरूप

णाधीननिरूपणवि(शेषस्य)षयस्यविलक्षणकारणजन्यस्यविलक्षणकार्य(करस्य)कारणस्यचानुभवसिद्धत्वाच्च । स्वतोविलक्षण स्यचनान्यसंबंधमात्रेणविलक्षणकारणजन्यत्वंविलक्षणकार्यकरत्वंचेत्युक्तं । तस्मादज्ञानवदभावादिरपिस्वतएवान्यस्माद्विल क्षणः । व्यवहारसमयेतुअनुभवसिद्धस्यापितस्याभाव(स्वभा)स्यभावविशेषस्यक्षीरमाधुर्यादिवद्विशिष्याख्यातुमशक्तःक्षीरपद वत्तदुपलक्षकंघटपदमेवप्रयुङ्क्तेघटोनास्तीतिअलंप्रसक्तानुप्रसक्त्या । नद्वितीयः । असत्यसुषिरज्ञानस्यापिसत्यसुषिरज्ञानवदसुषि रज्ञानाद्विषयोपाधिमनपेक्ष्यव्यावृत्तेरंगीकार्यत्वात् । तदेतदाह ॥ **सत्यतद्विषयज्ञानसदृशस्येति** । नचकृत्स्नसुषिरेंद्रियसंप्र योगादिसुषिरज्ञानसामग्र्यजन्यस्यास्यकथंविषयोपाधिमनपेक्ष्यासुषिरज्ञानाद्व्यावृत्तत्वाकारेणसुषिरज्ञानसदृशत्वमितिवाच्यं । दोषवशात्तदुपपत्तेः।अन्यथातवापिअसत्यसुषिरज्ञानस्यसुषिरविषयावच्छेदकस्याप्यभावप्रसंगादित्याह॥ **दोषवशादिति** ॥ **सत्तानभ्युपगमादिति** । वृत्तिरूपायास्तत्प्रतिबिंबितचैतन्यरूपायावाप्रतीतेःपरेणसत्यत्वानभ्युपगमात् । पक्षादिप्रतीतेर प्यनंगतावक्तुंशक्येत्यर्थः ॥ **किंचास्तीति** । व्याप्त्यादिकंस्वरूपेणसत्ज्ञाततयानुमानांगं । व्याप्तिप्रतीतिमात्रस्यव्यभिचारे पिसंभवात् । पक्षादिकंतुज्ञाततयैव । भ्रांतिप्रतिपन्नरजतादिकंपक्षीकृत्यतत्तद्वादिभिरसत्त्वादिसाधनात् । एवंचानुमानांगंसर्व प्रतीतिद्वारानांगमितिव्याप्त्यादेःस्वरूपसत्त्वमंगीकार्यमित्यर्थः । नन्वसतोपिसाधकत्वमस्तिअनुत्पन्नस्यापिकार्यस्यकारणगतश क्त्यवच्छेदकतादर्शनात्कालांतरेसत्त्वंनोपयोगीत्यादिशंकाप्राप्तौ। मैवं ।शक्त्यवच्छेदकताहिशक्तिविषयता ।साचशक्तिसाध्यते तिसाध्यत्वमेवानुत्पन्नस्यनतुसाधकत्वं । साध्यत्वंचनात्यंतासतः । किंतुप्रागभावप्रतियोगिनइत्यादिकंसमाधानंयद्यपिवक्तव्यम

स्तितथापिग्रंथगौरव भयात्संक्षिप्यतइत्याह ॥ **आस्तांविस्तरइति** । प्रत्यक्षादीनांप्राबल्यसिद्धयेतेषामनुमानोपजीव्यतामाह॥ **यथायथमित्यादिना**॥ **तदिदमुक्तमिति**।प्रत्यक्षादीत्यादिशब्दोपात्तमपिवाक्यमादरात्पुनरुपादानेननप्रत्यक्षवदागमस्यविवतसत्ताग्राहित्वंप्रयाससाध्यंकिंत्वनायाससिद्धमितिसूचितमित्यर्थः।प्रबलप्रत्यक्षविरोधेनांगीकार्याप्रामाण्यानुमानादिविरोधात्स्वतःप्राप्तप्रत्यक्षप्रामाण्यत्यागायोगात्प्रत्यक्षप्रामाण्यंतावदंगीकार्यं। तत्प्रामाण्यंचयत्कालाद्यवच्छेदेनस्वविषयोगृहीतःतत्कालाद्यवच्छिन्नतयातस्यासत्त्वेनोपपाद्यतइतितत्कालाद्यवच्छिन्नतयाप्रत्यक्षविषयस्यसत्त्वमंगीकार्यं। तथाचाविद्यमानस्यतत्कालाद्यवच्छेदेनासत्त्वस्यकेनापिप्रमाणेनगृहीतुमशक्यत्वात्कालांतरादिभाविनोपितत्कालाद्यवच्छेदेनतदसत्त्वग्राहिप्रमाणस्याभावनिश्चयात्। प्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वलक्षणंबाध्यत्वंकदापिनास्तीत्यत्यंताबाध्यतासिद्धिः। प्रत्यक्षेणयत्कालाद्यवच्छेदेनस्वविषयोगृहीतःतद्तिरिक्तकालाद्यवच्छेदेनासत्त्वंतुघटादेर्मयाप्यंगीक्रियतेपरिच्छिन्नत्वात्तस्य। तथाचप्रत्यक्षस्यापिकालत्रयाबाध्यत्वरूपसत्यताग्राहित्वमस्त्येव। आचार्यैस्त्वंगीकारवादःकृतइतिअभिप्रेत्याह ॥ **अंगीकारवादश्चेति**॥**अंतरंगत्वादिति**। दूष्यानुमानातिरिक्तहेतुनिरपेक्षत्वादित्यर्थः।ननुप्रयोग्यत्वादितिवक्तव्यं। चजोःकुघिण्यतोरितिकुत्वविधानादित्यतउक्तंप्रयोक्तुंशक्यत्वादिति । प्रयोज्यनियोज्यौशक्यार्थइतिशक्यार्थेप्रयोज्यशब्दस्यनिपातितत्वात्साधुत्वमित्यभिप्रायः । ननुसिद्धांतिनापिवस्तुतोरजतस्यदर्शनांगीकारात्कथंतस्यभ्रांतिसिद्धत्वमुक्तमित्यतआह ॥ **इदंमत्राकूतमिति** । नित्यज्ञानस्योत्पत्त्ययोगान्नित्यज्ञानविषयेऽव्याप्तिनिरासायनित्यज्ञानइत्युक्तं॥ **शुक्तिंसन्निकृष्टेति** । आरोपितस्यरजतस्येंद्रियसन्निकर्षायो

गादित्यर्थः । ननुरजतज्ञानंकथंशुक्तिविषयंस्यात् । अन्यज्ञानस्यान्यविषयत्वायोगादितिचेद्रजतज्ञानमितिकोर्थः । किंरजतसंबंधिज्ञानमिति । किंवारजतसन्निकृष्टकरणजन्यज्ञानमिति । यद्वारजतोल्लेखिज्ञानमिति । नाद्यः । चक्षुरादिजन्यतयाजन्यजनकभावसंबंधेनचक्षुरादिसंबंधिनोपिज्ञानस्यरूपादिविषयत्वोपलंभात् । नद्वितीयः । आपादकासिद्धेरुक्तत्वात् । तृतीयंदूषयति ॥ ॐ॥ अंतंएवेति । अतएवोल्लेख्येंद्रियसन्निकर्षयोर्भेदादेव । यदिंद्रियसन्निकृष्टंशुक्त्यादिअन्यात्मनाइंद्रियासन्निकृष्टरजतात्मनाऽवगाहतेउल्लिखतीतिकृत्वाभ्रमत्वं । इंद्रियसन्निकृष्टस्यैवोल्लेख्यत्वेसन्मात्रोल्लेखित्वेनभ्रांतित्वायोगादित्यर्थः । एतेनरजतस्याविषयत्वेरजतस्यज्ञानमितिषष्ठ्यर्थोननिरूपितःस्यात् । विषयविषयिभावातिरेकेणषष्ठ्यर्थस्यसंबंधस्याभावादितिनिरस्तं । उल्लेख्योल्लेखभावसंबंधस्यषष्ठ्यर्थत्वात् । नचतद्विषयत्वातिरिक्तंतदुल्लेख्यत्वंनास्तीतियुक्तं । उक्तरूपविषयताहीनस्यापिरजतस्यव्यावर्तकतामात्ररूपोल्लेख्यत्वानुभवात् । नचमयाहेतूकृतंदृश्यत्वंनदृग्जनककरणसन्निकृष्टत्वंकिंतुतदुल्लेख्यत्वमेव । त्वयापिसत्यत्वेतदेवहेतूकर्तव्यं । अन्यथाप्रकरणसमत्वायोगात् । नह्यर्थभेदेपिशब्दैक्यमात्रेणप्रकरणसमता । तथाचसत्यत्वसाधकदृश्यत्वहेतोःशुक्तिरूप्येव्यभिचारइतिसांप्रतं।यदिदृश्यत्वंदृग्जनककरणसन्निकृष्टत्वंतदाप्रकरणसमता । यदादृग्व्यावर्तकत्वमात्रंतदाविरुद्धत्वादिरितिपक्षभेदेनप्रकरणसमताभिधानात् । अतएववक्ष्यतितदभ्युपगमेननविरुद्धादिवादविरोधइति। दृग्व्यावर्तकत्वमात्रस्यात्मन्यपिविद्यमानतयात्वयातस्यहेतूकर्तुमशक्यत्वाच्च ॥ ॐ॥ सचेभ्रमएवेति । ननुकथमेतत्बाधकंविनाभ्रांतित्वायोगात् । नचारोपितस्यकरणसन्निकर्षोनास्तीतियुक्तिर्बाधिका । प्रत्यक्षविरोधेनयुक्त्यप्रामाण्यस्यैवन्याय्यत्वात् । स्व

मतेनुव्यवसायस्य नियतप्रामाण्यसाक्षिरूपत्वेनतदप्रामाण्येऽपसिद्धांतश्च । क्वचिज्ज्ञानगतप्रामाण्येसंदेहादिनातस्यमानसत्वे पि ज्ञानमात्रेक्वचिदपिसंहेहाद्यभावेनतस्यसर्वसाक्षिवेद्यतानियमइतिहिस्वसिद्धांतइतिचेत् । मैवं । भावानवबोधात् । रज तंदृष्टमितिरजतावच्छिन्नंदर्शनमेवानुभूयते । नतुदर्शनस्यरजतसन्निकृष्टेंद्रियजन्यत्वं । जन्यजनकभावस्य सर्वत्रान्वयव्य तिरेकावसेयत्वेनतस्याप्रत्यक्षत्वात् । अथापिससाक्षिवेद्यइत्यंगीकारेनिरवकाशयुक्त्यासावकाशसाक्षिणोबाधिततयाजन्य जनकभावेऽनुव्यसायोभ्रमःस्यादित्यापादनं(न)ह्यत्राभिप्रेतमितिनकोपिदोषइति ॥ ७।१७३ **नन्वनैकांत्यमिति** । एतदनुमाने सपक्षस्यब्रह्मणोदूष्यानुमानविपक्षत्वादस्यसपक्षवृत्तित्वं । दूष्यानुमानस्य विपक्षवृत्तित्वंविनानोपपद्यतइतिदूष्यानुमानाने कांतिकत्वमस्योपजीव्यं । तथैतदनुमानविपक्षस्यशुक्तिरूप्यस्यदूष्यानुमानदृष्टांततयास्वविपक्षाद्व्यावृत्तिर्दूष्यानुमानदृष्टांतस्य साधनवैकल्यंविनानोपपद्यतइतिदूष्यानुमानदृष्टांतसाधनवैकल्यमस्योपजीव्यमित्यर्थः ॥ ७।१७३ **हेतुदोषमिति** । साध्यवैकल्यंहि दृष्टांतस्यसाधारणानैकांतिकतामाश्रित्यप्रवर्तते । साध्यविकलदृष्टांतस्यैवविपक्षतयातद्वृत्तेर्हेतोरनैकांतिकतावश्यंभावात् । सा धनवैकल्यंत्वसाधारणानैकांतिकतामाश्रित्यप्रवर्तते । दृष्टांतेसाधनाभावे विपक्षादिवत्सपक्षादपिव्यावृत्त्यवश्यंभावादित्यादे रितिभावः ॥ ७।१७४ **सोप्यनुपसंख्येयस्स्यादिति** । उपसंख्यातश्चभासर्वज्ञादिभिरितिशेषः । नैयायिकैकदेशिभिरुदाहरणाभा सःपृथङ्नोपसंख्यातः । तान्प्रतिव्याप्यत्वासिद्धिमनाश्रित्यविरुद्धाद्यप्रवृत्तेः विरुद्धाद्यपिपृथगुपसंख्येयंस्यादितिवक्तव्यं ॥ ७।१७५ **व स्तुतस्तुनेयमिति** । आचार्यमतेऽसिद्ध्यव्याप्त्योरेवहेतुदोषत्वादितिभावः ॥ ७।१७६ **प्रामाणिकत्वमात्रस्येति** । तस्यैकरूपत्वा

न्नविशेषणमस्तियेनतद्वैयर्थ्यंचोद्येत । नन्वथापिप्रामाणिकत्वंप्रमाणज्ञातत्वं । तथाचज्ञातत्वेनैवपूर्णत्वात्प्रमाणग्रहणंव्यर्थमेव। ननुचैवमवयवार्थविचारेणवैयर्थ्याभिधाने मानविषयत्वंमेयत्वं । तत्रविषयत्वमात्रेणालं । किंमानग्रहणेनेत्यादेर्वक्तुंशक्यत्वा दतिप्रसंगः । तत्रप्रमेयपदेनैवसर्वमुपात्तं। नतुविशेषणोपादानार्थमधिकोयत्नःकृतोस्ति । यस्यवैयर्थ्यंशंक्यतइतिचेत् । मैवं। प्रकृतेपिप्रामाणिकग्रहणेनैवसर्वस्योपात्तत्वेनपरिहारसाम्यात् । किंचनप्रामाणिकत्वंप्रमाणज्ञातत्वं । किंतुप्रमाणविषयत्वं । तथाचपूर्वोक्तेदृश्यत्वस्याप्रवेशएवनास्तीति दृष्टत्वमात्रस्यव्यभिचारोस्तिनवेति विकल्पएवनसंभवति । नचात्रापिप्रमाणग्रह णंव्यर्थं । आरोपितरजतस्येष्टत्वेनेच्छाविषयेतस्मिन्विषयत्वमात्रस्यव्यभिचारादितिभावः । यद्येवंतर्हिप्रामाणिकत्वादित्येववक्तव्यं । लक्षणाश्रयणेप्रयोजनाभावात् । प्रमाणदृष्टत्वादितूक्तं । एवंचप्रमाणग्रहणवैयर्थ्यंतदवस्थमित्यपरितोषात् पक्षां तरमाह ॥ ७।१२७ **अथवेति** ॥ ७।१२० **द्वितीयेविरोधइति** । अतत्वावेदकप्रमाणदृष्टत्वस्यसत्यत्वाभावेनैवव्याप्तत्वादितिभावः ॥ **वि** ७।१२० **प्रतिषिद्धमिति** । तत्वावेदकस्यैवप्रमाणशब्दार्थत्वादितिभावः ॥ ७।१३० **अंसिद्धिरेवास्त्विति** । प्रत्यक्षादेःप्रमाणस्यैवाभा त्प्रमाणदृष्टत्वमसिद्धमितिभावः । प्रत्यक्षादीनामप्रामाण्येकारणांतराभावात्प्रपंचमिथ्यात्वमेवतत्रकारणमितिवाच्यं । प्रत्यक्षा दिप्रमाणसिद्धप्रपंचमिथ्यात्वंचकुतइत्युक्तेतद्ग्राहिप्रत्यक्षादीनामप्रामाण्यादितिवक्तव्यं । तथाचान्योन्याश्रयइत्याह ॥ ७।१३१ **नैवंपं चेति** ॥ ७।१३३ **ज्ञातृज्ञेयशून्यस्येति** । नतावदात्मैवज्ञाताज्ञेयोवा । परेणानंगीकारात् । नापितदतिरिक्तं । तस्यकल्पिततया मोक्षावस्थायामभावादित्यर्थः ॥ ७।१३४ **कल्पितस्येति** । अन्योन्यस्मिन्नन्योन्यात्मकतामध्यस्येतिवदतापरेणदेहादावात्मत्वा

रोपस्याभ्युपगतत्वादित्यर्थः ॥ ७।३५ अतिप्रसंगमिति । अयंभावः । दृश्यत्वनियामकत्वेनसंबंधोवाच्यइतिहित्वयोच्यते । यथोक्तं । नचदृक्संबंधमंतरेणदृश्यत्वमितियुज्यतेऽतिप्रसंगादिति । तदसंगतं । तथात्वेहितस्यापिनियामकांतरंकल्प्यं । एवं तस्यतस्यापीत्यनवस्थास्यात् । तथाचतत्परिहारार्थंकश्चित्स्वनिर्वाहकः स्वभावएवनियामकः । सचप्रतीत्युन्नेयइतिवाच्यं । त थाचादावेवतथास्तु । लाघवात् । नचैवंसतिस्वभाववादप्रसंगः । बहुधान्वेषणेपिनियामकांतरालाभेस्वभावस्वीकरणात् । प्रकृतेचवास्तवसंबंधस्यभवतैवमहताप्रयासेननिराकृततयातदलाभस्तावत्सिद्धः । आध्यासिकसंबंधोपिस्वस्यदृश्यतानिर्वाहार्थं माध्यासिकसंबंधांतरमपेक्षते । एवंतदपिसंबंधांतरमपेक्षतइत्यनवस्थानान्ननियामकः । किंचाध्यासिकसंबंधइतिकोर्थः । किंयः कश्चित्संबंधएवाध्यस्तइतिवाकिंवादृश्यस्यदृगध्यस्तत्वंनामसंबंधइति । आद्येसंबंधमात्रस्यैवमिथ्यात्वंलब्धंनदृश्यवर्गस्येतितवा भिमतासिद्धिः । नद्वितीयः । दृष्टदृश्यत्वनिर्वाहार्थंतत्कल्पनेदृष्टानेकपदार्थहानिप्रसंगेनतस्याकल्पनीयत्वात् । नह्यल्पस्य हेतोर्बहुत्यागोयुक्तइति । अथवाअस्तुकश्चिद्दृग्दृश्ययोःसंबंधः। सचसंबंधिभ्यांनभिद्यते । येनसंबंधिभिन्नसंबंधस्यसंबंधिनासंबं धांतरमंगीकार्यं । एवंतस्यतस्यापीत्यनवस्थास्यात् । नचैवंसंबंधाभावप्रसंगः । ज्ञानाभेदमात्रेणानंदाभावप्रसंगेनमोक्षस्यापुम र्थताप्रसंगात् । अस्मन्मतेऽभेदेपिविशेषबलादेकतरपरिशेषाभावस्यान्यत्रोपपादितत्वाच्च । ननुसतर्हिसंबंधःसंयोगःसमवा योवा । आद्यस्तावदस्त्वित्याह ॥ ७।३५ संयोगोवेति ॥ त्यज्यतांगुणत्वमिति । ज्ञानस्येतिशेषः॥ ७।३५ गुणस्त्वेवेति । अयमभिप्रा यः । गुणेक्रियातावदंगीकार्या । घटेगच्छतितद्गतरूपेपिगतिदर्शनात् । घटगतासारूपेप्रतीयतइतिचेत् । विपरीतंकिंनस्या

त् । पटावयवतंतुगतागतिःपटेप्रतीयतइतिवक्तुंशक्यत्वादतिप्रसंगाच्च । किंचगच्छत्पटनिष्ठमहारजनद्रव्येगतिरस्तिनवा । न चेन्महारजनस्यदेशांतरेणसहसंयोगोनस्यात् । असमवायिकारणाभावात् । नचपटनिष्ठक्रियातदसमवायिकारणं । कार्यैकार्थप्र त्यासत्तेःकारणैकार्थप्रत्यासत्तेश्चाभावेनतस्याःसमवायिकारणप्रत्यासत्त्यभावात् । नापिपटदेशांतरसंयोगः । देशांतरेणपट स्यसंयोगानंतरंमहारजनस्यदेशांतरेणसहसंयोगप्रतीतिप्रसंगात् । तंतुदेशांतरसंयोगादेवपटस्यदेशांतरसंयोगसिद्धौपटक्रिया भावप्रसंगाच्च । नचक्रियावतापटेनमहारजनसंयोगस्तदसमवायिकारणं । क्रियाहीनस्यमहारजनद्रव्यस्यक्रियावतापटे नसंयोगानुपपत्तेः । क्रियावत्संयोगस्यक्रियावत्प्रतिसंबंधिनिक्रियामुत्पाद्यतन्निष्ठक्रियाद्वारैवतस्यदेशांतरसंयोगोत्पादकतानि यमेनमहारजनेक्रियास्वीकारावश्यंभावाच्च । तस्माद्गच्छत्पटनिष्ठमहारजनेगतिरस्तीतिपक्षएवाश्रयणीयः । एवंचतद्रीत्या रूपादावपिक्रियासिद्धिः । अनुभवस्याविशेषात् । एवंगुणेगुणोप्यंगीकार्यः । एकंरूपंचतुर्विंशतिर्गुणाइतिगुणेपिसंख्यादि गुणप्रतीतेः । यद्यपिगुणेसंयोगव्यवहारंद्रव्ययोरेवसंयोगइतिदर्शनाभ्यासवान्जनोनकरोति । तथापिघटपटयोःसंयुक्तयोः सतोःतद्गतरूपेअपिसंयुक्तेइतिलोकःकरोत्येव । किंचरूपेणयुक्तोघटइतिसर्वेपिव्यवहरंति । तथापिसंयुक्तइतिनव्यवहरंतीति चेन्न । ध्वंसप्रध्वंसशब्दयोरिवानयोरर्थभेदास्फुरणात् । द्रव्याणांकर्मसंयोगइत्यादौजैमिन्यादिभिःपरीक्षकैरद्रव्यसंबंधेपिसं योगव्यवहाराच्च । तथाचज्ञानस्यगुणत्वेपितस्यविषयेणसहगुणात्मकःसंयोगःसंबंधोस्तु । नचज्ञानेसंयोगासमवायिकारण क्रियाभावात्संयोगानुपपत्तिः । रूपादौक्रियासाधनप्रकारेणज्ञानेपितत्साधनात् । नन्वतीतेनविषयेणकथंसंयोगइतिचेत् ।

किमतीतादेःसंबंधमात्रंनांगीक्रियतेसंयोगएववा । नाद्यः । संबंधाभावस्याप्यतीतसंबंधित्वाभावप्रसंगात् । प्रध्वंसादेरतीतादिसंबंधाभावप्रसंगाच्च । नद्वितीयः । तद्वत्संयोगस्याप्युपपत्तेः । नचास्माभिस्संयोगोद्दिष्टइत्यंगीक्रियते । येनविषयलक्षणाश्रयाभावेकथंतदाश्रितसंयोगोऽवतिष्ठेतेतिचोद्येत । किंनामसादृश्यादिवदेकाश्रितोऽन्यनिरूप्यइतिसंयोगइत्यबाधितव्यवहारास्पदत्वंचसंयोगलक्षणं । नचैवमन्योन्याश्रयः । पूर्वपूर्ववृद्धकृतव्यवहारविषयत्वज्ञानेनोत्तरोत्तरेषांव्यवहारोपपत्तेः । मंत्रइत्यभियुक्तप्रसिद्धिर्मंत्रलक्षणमितिमीमांसकैरंगीकृतत्वाच्चेति ॥ **प्रकारांतरेणेति** । संयोगातिरिक्तस्समवायःसंबंधः । सचानित्योनेकश्चेत्यादिःप्रकारांतरशब्दार्थः ॥ **अन्यएवेति** । उभयातिरिक्तेसंबंधेऽर्थापत्तिसिद्धेतस्योभयेतरत्वेसतिसंबंधत्वलक्षणंनामांतरंचकरणीयमित्यर्थः । अधिष्ठानभूतताद्दक्संसारावस्थायांप्रकाशतेनवा । आद्येदोषमाह ॥ **तर्हिसर्वेणेति** । प्रकाशमानदृगध्यस्तत्वस्यसर्वान्प्रत्यविशिष्टत्वादितिभावः । द्वितीयंदूषयति ॥ **नचाकेनेति** । अधिष्ठानप्रकाशरूपाध्यस्तस्फुरणोत्पाद्यस्याभावान्नकिंचिदपिप्रकाशेतेत्यर्थः ॥ **इतिसंक्षेपइति** । इदमंशावच्छिन्नेचैतन्येरजतमध्यस्तं । अविद्यावृत्तिप्रतिबिंबितसाक्षिचैतन्येनतुदृश्यते । एवंचयत्राध्यस्तंनतेनदृश्ययेनचदृश्यंनतत्राध्यस्तं । अपिचनित्यानुमेयविषयस्यपरोक्षवृत्तिज्ञानेध्यासस्त्वयापिनांगीक्रियते । अथापिनित्यानुमेयंतेनदृश्यमित्यंगीकार्यं । अन्यथाहेतोर्भागासिद्धिप्रसंगादितिनदृगध्यस्तत्वंदृश्यताप्रयोजकं । किंचयदिदृश्यंदृगध्यस्तंस्यात्तदादृग्घटइतितदनुविद्धतयाप्रतीयेत । नचदृशिदृक्त्वादन्यःसामान्याकारोस्ति । येनतदनुविद्धतयाघटादिःप्रतीयेत । नदृग्विषयानुविद्धतयेतिचोद्येत्यादियद्यपिबहुवक्तव्यमस्ति । तथ

पिग्रंथगौरवभयादुपरम्यतइतिभावः । ननुसाधयितुंयोग्यंहिसाध्यं । एवंदृष्टांतस्यापिसिद्धसाध्यसजातीयधर्मंप्रतिआश्रयत्वात्साध्यविकलत्वमिष्टमेवेत्यतआह ॥ [616]साध्यविकलइतीति ॥ [616]अपरोक्षतयाप्रतीत्यनुपपत्तेरिति । असतःपरोक्षप्रतीत्यभावेततोवैलक्षण्यस्यज्ञातुमशक्यत्वेनानिर्वचनीयत्वासिद्धिप्रसंगात्अपरोक्षतयेतिविशेषितं ॥ [616]न सत्त्वात्प्रतीतिरसत्त्वाच्चबाधइति । यथाभट्टमतानुसारिणात्वयापिगुणगुण्यादेरत्यंतभेदेगवाश्वादिवत्पृथक्साध्यादिप्रसंगादत्यंताभेदेचपर्यायत्वप्रसंगाद्भेदाभेदौस्वीकृतौनतूभयबहिर्भावः । यथावाजातेष्टेःशुद्धकाम्यत्वेपुत्रोजातइतिपुत्रजननरूपनिमित्तश्रवणविरोधात्शुद्धेनैमित्तिकत्वेचपूतएवतेजस्व्यन्नादइतिपूतत्वादिफलश्रवणविरोधात्संबंधिताधिकारोंगीकृतः। नतूभयबहिर्भावः। तथाशुक्तिरूप्यादेरत्यंतसत्त्वेबाधानुपपत्तेःअत्यंतासत्त्वेचप्रतीत्यनुपपत्तेरुभयात्मकत्वमंगीकार्यं ।तथाचख्यातेःसत्त्वेनबाधस्यचासत्त्वेनाप्युपपन्नत्वादर्थापत्तेरन्यथाप्युपपत्तिरित्यर्थः । किमर्थापत्तौप्रवृत्तायामपिविरोधःकिंवाविरोधादर्थापत्तिरेवनप्रवर्ततइति । आद्यंदूषयति ॥ [617]कोयंविरोधइति । द्वितीयंप्रत्याह ॥ [617]अन्यथेति ॥ [617]विधिसमुच्चयइति । नचनिषेसमुच्चयस्यतात्त्विकतापातः । निषेधसमुच्चयस्यातात्त्विकत्वेपिविधिसमुच्चयतात्त्विकत्वप्रसंगस्याविशेषात्॥ [617]उल्लेखमात्रमिति । यद्यपिज्ञानजनककरणसंबंधित्वरूपंविषयत्वंसत्त्वमपेक्षते । असतःकरणसंबंधायोगात् । तथापियथापरोक्षज्ञानंप्रतितज्जनिताभिवदनरूपव्यवहारविषयतायोग्यतारूपं कस्यज्ञानमित्युक्तेअस्यज्ञानमितिआश्रयाश्रयिभावादिसंबंधांतराभावेपिज्ञानावच्छेदकत्वरूपंवातदुल्लेख्यत्वंतथातदपरोक्षज्ञानंप्रत्यप्यस्तु । अविशेषात् । तथाप्यसतोपरोक्षज्ञानंभ्रांतेरन्यत्रनदृष्टचरमितिचेत्न । सद्विलक्षणस्यापिभ्रांतेर

न्यत्रतददर्शनादितिभावः ॥ **असिद्धाविति** । उपाधिसद्भावेनिरुपाधिकसंबंधरूपव्याप्तेरभावादुपाधिर्व्याप्यत्वासिद्धावंतर्भवतीत्यर्थः ॥ **अनैकांतिकइति** । उपाधिरूपव्यापकनिवृत्त्यापक्षात्साध्यरूपव्याप्यनिवृत्त्यापक्षस्यैवविपक्षत्वात्पक्षे वर्तमानस्यहेतोरनैकांतिकतेत्यर्थः ॥ **कालात्ययापदिष्टतायामिति** । उपाधिरूपव्यापकनिवृत्तिलक्षणप्रबलप्रमाणेनपक्षे साध्याभावस्यनिर्णीतत्वादितिभावः ॥ **सत्प्रतिपक्षतायामिति** । उपाधिव्यतिरेकस्यपक्षेदूष्यानुमानसाध्याभावसाधकत्वादितिभावः ॥ **दृष्टांतदोषइति** । साध्यादिमतएवदृष्टांतत्ववदुपाधिहीनस्यैवदृष्टांतत्वात्साध्यवैकल्यादिवदुपाधिर्दृष्टांतदोषइत्यर्थः ॥ **सर्वावसितावितिति** । उपाधेर्दोषत्वेसर्ववादिसंमतौसत्यामित्यर्थः । क्वचित्सर्वावसितमितिपाठः । तदासर्वावसितत्वंउपाधिदोषविशेषणं । सम्यग्बोधोबाधइत्युक्तेघटोयमितिसम्यग्बोधोबाधःस्यात्तदर्थमन्यथाप्रतिपत्तिपूर्वकमित्युक्तं । तावत्युक्तेशुक्तिकायांरजतत्वज्ञानानंतरंतस्यामेवेदमितिसम्यग्बोधोबाधःस्यात् । तदर्थतदुन्मूलनेनेत्युक्तं । अन्यथाप्रतिपत्तेरुन्मूलनंचतद्विषयासत्त्वज्ञापनंवातस्याभ्रांतित्वज्ञापनंवेतिद्रष्टव्यं । सम्यग्ग्रहणाभावेतुवल्मीकेस्थाणुत्वभ्रमानंतरंनायंस्थाणुःकिंतर्हिपुरुषइतिभ्रांत्यंतरमपिबाधःस्यात्तदर्थसम्यग्ग्रहणं ॥ **विपरीतप्रमाणविषयत्वमात्रमिति** । नेदंरजतमित्यभावग्राहकप्रमाणंप्रतिरजतादेःप्रतियोगित्वेनावच्छेदकतयाविषयत्वमात्रमित्यर्थः । मात्रपदेनान्यथाप्रतिपत्तिपूर्वकंतदुन्मूलनंचव्यावर्तितं । तेनोक्तरूपंबाधंप्रतिनिषेध्यतयाविषयत्वरूपाद्बाध्यत्वात्प्रमाणविरुद्धत्वस्यभेदइतिद्रष्टव्यं ॥ **अनुपसंजातबाधभ्रमेप्रमाणविरुद्धत्वंनास्तीत्यव्याप्तिरिति** । अनुपसंजातबाधभ्रमविषयेमिथ्यात्वस्यसत्त्वेपिप्रमाणविरुद्ध

त्वंनास्तीत्युपाधेःसाध्यव्यापकतानास्तीत्यर्थः ॥ **बाधार्हत्वस्येति** । प्रबलविपरीतप्रमाणविषयत्वयोग्यतारूपप्रमाणविरुद्धत्वलक्षणोपाधेरित्यर्थः । नतुबाधार्हत्वरूपसाध्यस्येतिभ्रमितव्यं । तत्रतस्यपरेणाप्यंगीकृतत्वात् । नविपरीतप्रमाणविषयत्वमात्रमुपाधिःकिंतुतद्योग्यत्वं । तच्चतत्राप्यस्तीतिसिद्धासाध्यव्यापकतेतिभावः । एतच्चभ्रांतिसमानाधिकरणमेवविपरीतप्रमाणमभ्युपेत्योक्तं । वस्तुतस्तुअनुपसंजातबाधभ्रमेविपरीतप्रमाणविषयत्वंचास्त्येव । भ्रांतेनतदभावस्याज्ञातत्वेपिईश्वरादिभिस्तदभावस्यज्ञातत्वात् । नहियथाभ्रांतिसमानाधिकरणमेवभ्रांत्युन्मूलनेनबाधकंभवतीतिनियमः । तथाभ्रांतिसमानाधिकरणमेवविपरीतप्रमाणंभवतीतिनियमः । अनुपसंजातबाधभ्रमेप्रमाणविरुद्धत्वमस्तीतिक्वचित्पाठः । तत्रानुपसंजातबाधभ्रमविषयेभ्रमविषयत्वात्प्रमाणविरुद्धत्वेसत्यपिअनुपसंजातबाधत्वात् । बाधविषयत्वरूपबाध्यत्वस्याभावेनयत्रोपाधिस्तत्रसाध्यमितिसमव्याप्तेरभावादनुपाधित्वमित्यभिप्रायेणानुपसंजातबाधेत्यनेनग्रंथेनशंकितत्वात्तत्रापिबाधार्हत्वस्यसत्त्वादित्यनेनग्रंथेनपरेणापिबाध्यत्वंबाधार्हत्वमेवविवक्षणीयं । अन्यथानुपसंजातबाधभ्रमविषयेदृश्यत्वहेतोर्व्यभिचारप्रसंगात् । बाधार्हत्वंचतत्राप्यस्तीतिसमव्याप्तिरस्तीतिभावेनपरिहृतमितिव्याख्येयं ॥ **प्रतीतिप्रमाणानामिति** । नेहनानेत्यादिवाक्यानामेवेत्यर्थः । दृश्यत्वेनैवप्रमाणविरुद्धत्वंप्रपंचेसाध्यते । तथाचसाधनवत्पक्षादव्यावृत्तेःसाधनव्यापकउपाधिरित्याशंक्याह ॥ **दृश्यत्वेनेति** । ननुयदादृश्यत्वेनमिथ्यात्वप्रमाणविरुद्धत्वयोरन्यतरत्साध्येततदैकस्यसाधनेऽपरउपाधिर्भवतीतिनकस्यापिसिद्धिःस्यात् । यदातुमिथ्यात्वेसतिप्रमाणविरुद्धत्वंविशिष्टंसाध्येततदाकथ

मितिचेत् न । साध्यविशेषणप्रयोजनानांसिद्धसाधनतापरिहारादीनामभावेनतथासाध्यनिर्देशासंभवात् । उपाधित्वेनशंक्यमानानामनंतत्वेनतेषांसाध्यशरीरप्रवेशनायोगाच्च । किंचपक्षेतरत्वंपक्षेनसाधयितुंशक्यं । व्याघातात् । अनुकूलतर्कसद्भावेचतस्याप्युपाधित्वात् । एतेनकेनचिद्धेतुनाविश्वसत्यतासाधनेप्रमाणविरुद्धत्वमुपाधिस्तत्साधनेचसत्यत्वमुपाधिरितिस्वव्याघातइतिनिरस्तं । अनुकूलतर्काभावएवैवमाश्रयणात् । मिथ्यात्वसत्यत्वसाधकानुमानेषुचानुकूलतर्काभावाभावयोरन्यत्रोक्तत्वाच्चेत्यलं । उपाधिरेवप्रयोजकइत्याह ॥ **लोकइत्यादिना** ॥ [६।३३] **पक्षसपक्षविपक्षाःप्रतिज्ञाहेतुदृष्टांताश्चव्यवहृता इति** । यद्यपिविपक्षपदंप्रतिज्ञापदंचेहाचार्येणनप्रयुक्तं । तथापिआत्मनोपिदृश्यत्वादित्यत्रविपक्षस्यात्मनोपिविवक्षितत्वाद्विपक्षोपिव्यवहृतः । तथाप्रतिज्ञादोषमाश्रयासिद्ध्यादिकंकथयताप्रतिज्ञाप्यर्थाद्व्यवहृतेतिभावः ॥ [६।३४] **नास्तिकश्चिदिति** । साध्यशब्देनकिंसंदिग्धोधर्मोविवक्षितः । किंवाप्रतिज्ञापनीयः । अथवाप्रमित्सितः । नाद्यः । प्रमाणसंप्लवादिनानिश्चितेपिअनुमानप्रवृत्तेरंगीकारात् । नद्वितीयः । स्वार्थानुमानेप्रयोज्यकर्तृरभावेनप्रज्ञापनाभावात् । नतृतीयः । अनिष्टानुमानाभावप्रसंगादित्यादिरुपप्लवोनास्ति । लिंगजन्यप्रतीतिविषयधर्मस्यसाध्यधर्मपदेनविवक्षितत्वादित्यर्थः ॥ **अग्निविशिष्टस्यपर्वतस्य साध्यत्वादिति** । यथाग्निःपर्वतसंबंधितयासाध्यस्तथापर्वतोप्यग्निसंबंधितयासाध्यः । स्वरूपमात्रसिद्धावपिविशिष्टासिद्धेरुभयत्रसमत्वादित्यर्थः । एवंचाग्निविशिष्टस्यपर्वतस्यापीत्यपिशब्दाध्याहारेणयोज्यं । अन्यथासाध्यत्वंधर्मस्यतत्संबंधितयैवेत्युत्तरग्रंथविरोधात् ॥ **तथाचसाध्यत्वमिति** । यद्यपिसाध्योधर्मोयस्येतिबहुव्रीहेराश्रयितुंशक्यत्वाद्विशिष्टग्रहणंनलक्षणांतर्ग

तं । तथापिधर्मस्यनस्वरूपेणसाध्यत्वमित्यर्थसूचकत्वाद्विशिष्टग्रहणंसार्थकमित्यर्थः । साध्यधर्मविशिष्टत्वंसाध्यधर्मसंबंधित्वं । तच्चव्याप्यतयासाधनस्याप्यस्तीतितत्रातिव्याप्तिपरिहारार्थंकश्चिद्धर्मिग्रहणंकृतं । तन्नकर्तव्यमित्याह ॥ **विशिष्टत्वचेति** ॥ **विवक्षितमिति** । धर्मिग्रहणंकुर्वताप्यवश्यंसाध्यविशिष्टशब्देनसाध्येनधर्मितयासंबंधित्वंविवक्षितत्वैवातिव्याप्तिःपरिहरणीया । नतुधर्मिग्रहणेन । साधनस्यस्वनिष्ठधर्मप्रतिधर्मित्वादित्यर्थः ॥ **इतिनातिप्रसंगइति** । समानत्वंकिंसर्वथोतकथंचित् । नाद्यः । संदिग्धत्वादिनासाम्यस्यमहानसगताग्नावप्यभावात् । नद्वितीयः । अन्यभावस्यापिप्रमेयत्वादिनासाध्यसमत्वेनतद्वतोपिविपक्षस्यापिसपक्षताप्रसंगादित्ययंदोषोनास्ति । संदिग्धत्वादिकंविनाव्यापकतावच्छेदकाग्नित्वादिनासाध्यस्यविवक्षितत्वात् । नहिधूमव्यापकत्वमग्निमत्त्वेनैवप्रमेयत्वेनावच्छिद्यते । प्रमेयत्वस्यधूमव्यापकेघटादावपिविद्यमानत्वात् । अतिप्रसक्तस्यचावच्छेदकत्वायोगादितिभावः ॥ **येनोकारेणेति** । नचपक्षइत्यादिकंतथा । पक्षत्वाकारस्यपर्वतसंबंधित्वेनवह्निजिज्ञासामंतरेणजिज्ञासितत्वेनप्रतिजानतापिपुरुषेणतस्यजिज्ञापयिषितत्वात् । यत्रतुपक्षत्वमेवजिज्ञापयिषितंतत्रायंपक्षइतिवचनमपिप्रतिज्ञाभवतीतिभावः ॥ **अतएवेति** । निगमनेहिसाधनोपलक्षितोवह्निःपर्वतसंबंधितयानिदर्श्यते । नचसाधनोपलक्षितोवह्निर्हिजिज्ञापयिषितः । पक्षसंबंधितयासाध्यस्यैवह्निजिज्ञापयिषितत्वात् । साधनस्यतज्ज्ञानोपायत्वेनोपादानादितिभावः ॥ **अर्थस्यैवात्रविवक्षितत्वादिति** । असिद्धोहेतुरित्यत्रार्थासिद्धेरेवोक्तत्वेनतस्यैवात्रलक्षणीयत्वादित्यर्थः ॥ **तल्लक्षणमेवोक्तमिति** । लिंगमित्यनेनहेतुशब्दार्थलक्षणमेवोक्तमित्यर्थः ॥ **अर्थेवर्ततइति** । हेतुशब्दइत्यनुवर्तते ॥

व्याप्तिग्रहणस्थलमिति । यत्रसतोर्व्याप्यव्यापकयोर्व्याप्तिर्गृह्यते तद्व्याप्तिग्रहणस्थलमितिद्रष्टव्यं ॥ नाप्यभेदादिति । चिदात्मनेत्युक्त्याभेदात्प्रसक्तोयोगुणगुणिभावःसोपिनेतिगुणग्रहणंकुर्वतोक्तमित्यर्थः । अभेदेपिविशेषबलाद्गुणगुणिभावोभविष्यतीतिभावः ॥ अभीष्टफलदातारंशुकादिद्विजसेवितं । भवाध्वाटनखिन्नोहंविष्णुमंदारमाश्रये ॥ इतिश्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येणव्यासयतिनाविरचिताप्रपंचमिथ्यात्वानुमानखंडनपंचिकाभावप्रकाशिकासंपूर्णा ॥ ॥ ॥

अयं ग्रंथः कुंभघोणस्थमध्वविलासपुस्तकालयाधिपतिभ्यां अपशंकररामाचार्य, टी. आर्.
कृष्णाचार्यनामभ्यां पंडितैः संशोध्य मुंबय्यां निर्णयसागरमुद्रणयंत्रे
मुद्रयित्वा प्रकाशितः । शके १८१८

॥ मिथ्यात्वानुमानखंडनमंदारमंजरीसंपूर्णा ॥